THE

# PUNJAB SANSKRIT SERIES

No. II.

THE

# PUNJAB SANSKRIT SERIES

OR

A COLLECTION OF RARE AND UNPUBLISHED

# SANSKRIT and PRAKRIT WORKS

EDITED BY

THE WELL-KNOWN AND EMINENT SCHOLARS

OF

INDIA, EUROPE and AMERICA

No. 2.

LAHORE (INDIA)

THE PUNJAB SANSKRIT BOOK DEPOT

1922

# जैमिनिगृह्यसूत्रम्

THE

# JAIMINIGṚHYASŪTRA

BELONGING TO THE SĀMAVEDA

WITH

EXTRACTS FROM THE COMMENTARY

EDITED WITH

An introduction

and translated for the first time into English

BY

**Dr. W. CALAND,**

Professor of Sanskṛt in the University

of Utrecht.

PUBLISHED BY

**MOTI LAL BANARSI DASS**

*Proprietors*

**The Punjab Sanskrit Book Depot, Lahore.**

**1922**

PUBLISHED BY
**Moti Lal Banarsi Dass**
The Punjab Sanskrit Book Depot,
*Said Mitha Street, Lahore.*



PRINTED BY
Sardari Lal Jain,
*Manager*
The Bombay Sanskrit Press,
*Said Mitha Street, Lahore.*

# INTRODUCTION.

## Remarks on the literature of the Sámaveda in general.

According to Hindu tradition the Sāmaveda comprised once no less than a thousand "schools or branches" (*śâkhâs*). But, as in these schools the holy texts were studied at forbidden times, Indra is said to have destroyed them with his thunderbolt. So only few of them are now a days extant. In the first place the śākhā of the Rāṇāyanīyas, which is subdivided into seven parts: Rāṇāyanīyas, Śātyamugras, Kālopas, Mahākālopas, Lāṅgalāyanas, Śārdúlas and Kauthumas. According to some authorities the Kauthumas fall into six subdivisions: Kauthumas, Āsurāyaṇas, Vātāyanas, Prāñcadvainabhṛts, Prācīnayogyas and Naigamīyas (cp. Mahīdāsa on Caraṇavyūha, p. 44 ed. of Benares). Besides this tradition others tell us, that the Rāṇāyanīyas comprised nine schools: Rāṇāyanīyas, Śāṭyāyanīyas, Sātyamudgalas, Khalvalas, Mahākhalvalas, Lāṅgalas, Kauthumas, Gautamas and Jaiminīyas. Further tradition informs us, that at present of all these śākhās only three are left over: the Kauthumas in Gurjara (Guzerat), the Jaiminīyas in Karṇāṭaka (the present Karnatik) and the Rāṇāyanīyas in Mahārāṣṭra (the country of the Marāṭhas). To our knowledge have come the text books of these three śākhās, if not wholly complete.

As the Vulgata of the Sāmasaṃhitā is considered that of the Kauthumas, while eight Brāhmaṇas are handed down as belonging to this śākhā: 1. The Tāṇḍyamahābrāhmaṇa or Pañcaviṃśa brāhmaṇa (ed. in the Bibl. Indica); 2. The Ṣaḍviṃśabrāhmaṇa (edited by H. F. Eelsingh: Ṣaḍviṃśabrāhmaṇam vijñāpanabhāṣyasahitam, Leiden, Brill 1908 and by Jibananda Vidyasagara, Calcutta 1881); 3. The Sāmavidhānabrāhmaṇa (edited by Burnell, London 1873 and by Satyavrata in the

journal Uṣā, Calcutta 1895, translated into German by Sten Konow, Halle, 1893); 4. The Ārṣeyabrāhmaṇa (ed. by Burnell, Mangalore 1876, and by Satyavrata in "Uṣā", Calcutta 1892); 5. The Devatādhyāyabrāhmaṇa (ed. by Burnell, Mangalore 1873 and by Vidyasagara together with the Ṣaḍviṃśa); 6. The Upaniṣad-brāhmaṇa, of which the first two prapāṭhakas contain the Mantrabrāhmaṇa (ed. by Satyavrata in "Uṣā" 1890); the last eight prapāṭhakas comprising the Chāndogya-upaniṣad (ed. by Röer in the Bibl. Indica and by Böhtlingk with a german translation, Leipsic 1889); 7. The Saṃhitopaniṣad (ed. by Burnell, Mangalore 1877); 8. The Vaṃśabrāhmaṇa (ed. by Burnell, Mangalore 1873 and in the "Uṣā" 1892).

The following Sūtras are dependent on the Saṃhitā and the Brāhmaṇas of the Kauthumas: 1. The Maśaka-kalpasûtra or Ārṣeyakalpa (ed. by W. Caland, Brockhaus, Leipsic 1908); 2. The Kṣudrasûtra, being an appendix to the ārṣeyakalpa (printed after this text); 3. The Śrautasûtra of Lāṭyāyana (ed. in the Bibl. Indica); 4. The Gṛhyasûtra of Gobhila (ed. in the Bibl. Indica and with German translation by Fr. Knauer, Dorpat 1884; English transl. by H. Oldenberg in Sacred Books of the East, vol. XXX); 5. The Śrādhakalpa of Gobhila or Vasiṣṭha (ed. in the Bibl. Indica as an appendix to Gobhila); 6. The Karmapradīpa or Chandogyagṛhyapariśiṣṭa (ed. by Jiv. Vidyasagara in Dharmaśāstra saṃgraha and elsewhere); 7. The Gṛhyāsaṃgraha (ed. by Bloomfield in the Journal of the German Oriental Society, vol. 35, and in the Bibl. Ind. and the "Uṣā"). There are many texts more as the Puṣpasûtra, the Pañcavidha-sûtra (both ed. by Simon), the Nidānasûtra etc., most of which have been edited. For a complete survey of these

texts see: "Die Jaiminīya Saṃhitā" ed. by W. Caland, Breslau 1907, page 14.

Thus for the texts of the Kauthumas.

Whether the Rāṇāyanīyas are a śākhā or a caraṇa, i. e. whether, besides an independent tradition of the sūtras they possess a separate recension also of the Saṃhitā, is not yet ascertained: the Audgātraprayoga of Sāyaṇa, who, as we know, adhered to the Sūtra of Drāhyāyaṇa, shows in the musical notation of the Sāmaveda divergencies, although slight, from the Vulgata. For the rest are at present considered as Rāṇāyanīya texts the following: 1. The Drāhyāyaṇaśrautasūtra (edited partly by Reuter, London, Luzac 1904); 2. The Khādiragṛhyasūtra (ed. with the comm. of Rudraskanda at Mysore 1913, and translated H. Oldenberg in the Sacred Books of the East, vol. XXIX); 3. The Gautamapitṛmedhasūtra (ed. by W. Caland together with the Pitṛmedhasūtras of Baudhāyana and Hiraṇyakeśin, Leipsic 1896); 4. The Gautamasmṛti (ed. with Telugu comm. by Chentral Rao Pantalu, Madras 1890). But it is at far from certain, that all these texts belong to the Rāṇāyanīyas. Āśārka in his commentary on the Karmapradīpa informs us that the Gobhilasūtra contains the domestic ritual followed not only by the Kauthumas but also by the Rāṇāyanīyas. In agreement with this statement is the fact, that Hemādri in his Śrāddhakalpa thrice (pag. 1424, 1460, 1468) designates Gobhila as the Rāṇāyanīyasūtrakṛt. If we accept these statements, the Khādirasūtra cannot be also the Sūtra of the Rāṇāyanīyas. Now, in Southern India there is said to exist a Khādiragṛhyasūtra of the Śārdūlas (see Report on a search for Skt. mss. in the Bombay Presidency 1891–1895, by A. V. Kathavate, Bombay, 1901, No. 79), who also are a śākhā of the Sāmaveda, and this Sūtra of the Śārdūla-

sāmagas agrees, as I am informed, with the exception of a few various readings, with the text of our Khādirasūtra. That at the time of Hemādri there existed a living tradition of the Śārdūlaśākhā is seen also from his Śrāddhakalpa, where (on page 1078), he mentions those parts of the Veda that are to be recited by the Śārdūlaśākhins during the feeding of the Brāhmaṇas. It is, therefore, possible that at least the Khādirasūtra contained originally the domestic ritual of the Śārdūlas. But there is still another tradition current about this Khādirasūtra. In the Gṛhyaratna edited at Mysore in 1881 with the commentary called Kaṇṭhabhūṣaṇa, we find several times cited a Gautamagṛhyasūtra, and all the passages here attributed to Gautama are to be found in our Khādirasūtra. Besides, we possess, as has been noted above, a Pitṛmedhasūtra of the Gautamas, a Gautamadharmasūtra (ed. by Stenzler, London 1876) and a Gautamasmṛti. All these may have been the books of the Gautamas, who also formed a subdivision of the Sāmaveda.

Of the third greater śākhā belonging to the Sāmaveda, the Jaiminīyas, until a few years ago but one single book was known, viz. the Talavakāra or Kena Upaniṣad. A. C. Burnell, who during his sojourn in Southern India published many Sāmaveda texts, brought to Europe a collection of other texts belonging to this śākhā. Of these texts are now published: 1. The Jaiminīyasaṃhitā (Die Jaiminīyasaṃhitā mit einer Einleitung über die Sāmaveda literatur by W. Caland, Breslau 1907); 2. The Jaiminīyabrāhmaṇa partly; of this important and extensive Brāhmaṇa copies procured by Burnell are to be found at the India Office in London. Several miner parts have been published by H. Örtel in the Journal of the American Oriental Society. As the manuscript materials, however, were inadequate to give a complete edition of this

book, the writer of this Introduction published large extracts from it (Das Jaiminīyabrāhmaṇa in Auswahl, Text, Übersetzung, Indices; Amsterdam, 1919); 3. The Jaiminīya-upaniṣadbrāhmaṇa (properly: the Gāyatryupaniṣad, being a part of the great Brāhmaṇa; ed. by Örtel, New Haven 1894 as Vol. XVI of the J. A. O. S.); 4. The Ārṣeyabrāhmaṇa (the Jaiminīya text of the Ārṣeya brāhmaṇa of the Sāmveda ed. by Burnell, Mangalore 1878); 5. The Jaiminīyaśrautasútra (edited with a Dutch translation under the title: "Bijdrage tot de Kennis von het vedische ritueel" by D. Gaastra, Brill, Leiden 1906); 6. and lastly The Jaiminigṛhyasútra, on which text see below. Besides these texts, now printed, the India Office possesses also copies of the Gānas of the Jaiminīyas, brought to Europe also by Burnell. But until the key to its musical notations is found, an edition of these books can hardly be expected.

## Remarks on the Jaiminigṛhyasútra.

In his Introduction to the Ṛktantravyākaraṇa (page XLIX) Burnell informed us, that a copy of the Gṛhyasûtra of the Jaiminīyas with a commentary by Śrīnivāsa had just (in the year 1879) come into his possession. This Manuscript was presented to the India office, and through the kindness of Dr. F. W. Thomas, Chief Librarian of the India Office, I was allowed to make use of it. The Mss. is in excellent condition, in Grantha characters. On the title page we read in Burnell's handwriting:

"A. C. Burnell, 1879.

I. Jaiminigṛhyasûtra with C. by Çrīnivāsa. The author refers to previous Kārikās and Vṛttis.

2. Vinatānanda, a prayoga to the same.

Both from Tinavelly MSS. 1. about 200 years old.
2 recent."

The Manuscript is registered as B 464, written neatly on blue paper on 73 folia, 19 c. m × 24 c. m, in Grantha. Each Sútra is followed by its bhāṣya.

In two Reports ( "Report on a search for Skt. and Tamil mss. for the year 1896/97 by Śeṣagiri Śāstrī No. 1, Madras 1898" and in a ditto for the year 1893/94 ) I found two more mss. of this text mentioned under No. 24 of the no, 1 and under no. 65 of no. 2. The first of these two is a copy of an original from Trichinopoly, on paper in Nāgāri comprising 48 pages of 15 lines each. This copy contains the continuous text of the Sûtra alone. The second of the two Madras mss. gives the commentary called Subodhinī composed by Śrīnivāsin Adhvarin; this is a copy of a Telugu original on paper, 100 pages of 20 lines each.

On these three mss. so based the text as given below:

B. designates the ms. of Burnell at the India Office.

$M^1$ designates the first Madras ms. (text only).

$M^2$ designates the second Madras ms. (Subodhinī).

The text is given by me continuously, just as found in $M^1$, without division into Sŭtras. To facilitate understanding the sentences are separated by a small daṇḍa above the line. In indicating the close of a sentence the commentary was mostly, but not always, my guide.—Of the commentary only extracts are presented, but I do not believe that anything deserving mention has been omitted. Against ordinary use Śrīnivāsa comments also on the mantras. These vyākhyās have been received into the extracts only for those mantras, which do not occur in any printed text, or when they occur only in the Mantrabrāhmaṇa of the Kauthumas. I regret to state that I was not able to give a wholly faultless text as the text of the commentary as handed down only in one ms.(B) complete, $M^2$ treating of the second part only the

śrāddha, the aṣṭakāritual, the gṛhavidhi, and the anaśnatsaṃhitākalpa.

A few remarks must be made concerning the relation of the commentary to the text as handed down in M[1]. It is only in the first part (the first Adhyāya) that Śrīnivāsa follows this text closely. As to the second part, the commentary disagrees in two respects the texts of M[1]. First there is no trace that to Śrīnivāsa were known the adbhutaśānti (II. 7) and the grahahoma (II. 9). Consequently these two chapters were the most difficult to reconstruct. In the second place the disposition of the materials in the Subodhinī differs in some respects from the one in the text of M[1]. After treating Khaṇḍa 3 the Subodhinī continues: *itaḥ param âhitâgneḥ śarîranâśe ityâdi* (cp. p. 29, l. 12 of the text) *dahanâdisâpiṇḍyânta-vidhâyakasûtrâṇy ante vyâkhyâsyâmaḥ.* Then follows immediately the exposition of kh. 6 (gṛhakarma) as fourth kh. and after it the anaśnatsaṃhitākalpa (kh. 8). No numbering of khaṇḍas is given further on, at the end we read only *ity anaśnatsaṃhitâkalpaḥ.* Then follows, in agreement with what had been stated by Śrīnivāsa (see above), the treatment of khaṇḍa 4, introduced by the words, *atha dahanapaṭalo vyâkhyâyate.* Having then treated from khaṇḍa 4 unto p. 29, l. 17 (unto: *madhye śarîram,* these included) Śrīnivāsa deviates again from the text as given by M[1], as he begins communicating some passages from the Jaiminīyabrāhmaṇa (viz. I. 46–48, cp. the extracts of the commentary on page 65 ) and explaining them ( *atha âhitâgneḥ kramasaṃskâra ucyate* ). As the Sūtra itself ( p. 30, l. 1–2) refers to this passage of the Brāhmaṇa with the words *tasya nâsikayoḥ sruvau nidadhyâd ity etenânuvakena* this passages cannot have formed a part of the Sútra proper. After treating this matter, and lending with the words: *ity*

*ahitâgnidahanakalpah*, Śrīnivāsa continues explaining the text, first the passage p. 29, l. 17—unto p. 30, l. 9 (unto *anaveksamânah*, incl. ); this part and indicated: *iti dvitiyah patalah*. Then follows the exposition of p. 30, l. 9—p. 31, l. 9. At the end we read: *iti dahane trtiyah patalah*.

On the relation of the Jaiminigrhyasûtra to the other txts of the Jaiminīyas the following may be said. From various facts it is clear, that our sūtra is a genuine text of the Jaiminīyas and that it attaches itself to the other books of this śākhā.

While in the list of Veda-teachers, to whom at the utsarga ceremony libations of water are to be presented, the Rāṇāyanīyas begin with Rāṇāyani and end with Jaimini (cp. Simon, Beiträge zur Kenntniss der Vedischen Schuler, p. 27, rem. 1, and Subrahmaṇyavidvān, Gobhilagrhyaprakāśikā, p. 113), the Jaiminigrhya mentions Jaimini Talvakāra in the first place (cp. the text, p. 14, l. 11).

The Vrātikavrata prepares the student for the study of the Vratas, i. e. of those parvans of the Saṃhitā, which begin with the vrataparvan; thus the commentary, and cp. Jaim. grhs. p. 15, l. 8. This statement agrees with the sequence of the Sāmans as handed down by the Jaiminīyas, this śākhā beginning the Āraṇyaka with the vrataparvan, in contrast with the tradition of the Kauthuma-Rāṇāyanīyas who begin with the arkaparvan, cp. Jaim. ārṣ. br. p. 23 and Ārṣeyabrāhmaṇa (Kauth.) p. 62, both cited according to Burnell., edition of these texts.

The Aupaniṣada vrata prepares for the study of the Upaniṣada, which according to Śrīnivāsa, comprises ten adhyāyas. This statement seems not to agree with other facts, as the Jaiminīya upaniṣad brāhmaṇa, edited by Örtel comprises not ten adhyāyas, but twelve anuvākās. On the other hand the assertion of Śrīnivāsa, does agree with

a communication made by Burnell to Max Müller (see Sacred Books of the East, vol. I, p. Xc.): "The Kena upaniṣad comprises the 135–145 Khaṇḍas or the tenth anuvāka" (that is, of the Jaiminīya brāhmaṇa).

Most conclusive, however, is the fact that our Sûtra refers repeatedly to the Jaiminīyasaṃhitā, indicating by their pratīka the verses, that are to be taken from this Saṃhitā and thus presupposing it as known to its readers (or auditors ?). So e. g. the puruṣasûkta according to the Subodhinī (see p. 44, l. 15) has seven verses, whereas the Kauthuma recension knows only five. This is in harmony with the Saṃhitā, where the seven verses of this sûkta are handed down in II. 3. 6–II. 4. 2.

The Jaiminīyabrāhmaṇa also is supposed to be familiar to those, who accept the domestic ritual of our Sûtra as their own. This is clearly seen from Jaim. gṛhs. II. 4 (p. 29, l. 12), where the author refers to the 48th. and 46th. anuvāka of the first book of the Brāhmaṇa (see J. A. O. S., vol. XIX, p. 106, 103).

There is one point of linguistic character, where our Sûtra harmonizes with the tradition of the Jaiminīyas, viz. the use of the Tamil-malayālam ḷ instead of Sanskṛt *d*; this *ḷ* occurs twice: in *Kāraḷi* (p. 14, l. 12) and in *iḷopahavana*.

That Hindu tradition itself knew our Sūtra to be that of Jaimini is proved by a citation (this is the only passage, where I found the Jaiminigṛhya cited) found in the unpublished Bhāṣya of Sāyaṇa on the Darśapûrṇamasasûtra of Baudhāyana. Sāyaṇa here says: *talavakārakalpe jaiminiś cāha: āhitāgneś cet pûrvaṃ jāyā mriyeta tāṃ nirmanthyena dahet saṃtāpanena veti.* The passage occurs Jaim. gṛhs. II. 5 (beg.).

About the relation of the Jaiminigṛhyasûtra to the other Gṛhyasûtras of the Sāmaveda we remark that our Sûtra, as is to be expected, has a closer affinity to the Sûtras of the Sāmaveda (Gobhila and Khādira)

than to the Sûtras of any other Veda. Whereas Gobhila and Khādira differ from one another principally in the distribution of the materials, the Khādira, moreover, being more concise than the Gobhilasûtra, the Jaiminisûtra as compared with them, has a totally independent character. It is true that many a sentence of the Jaiminisûtra agrees verbally with the Gobhilasûtra: compare Gobh. I. 1. 9 with Jaim. 1. 2—3 (we remark the ungrammatical *prācyaḥ* in Jaim.); Gobh. I. 1. 10 with Jaim. 1. 3; Gobh. I. 5. 15 with Jaim. 1. 9—10; Gobh. I. 5. 18 with Jaim. 1. 11—12; Gobh. IV. 5. 4 with Jaim. 2. 3; Gobh. IV. 5. 5 with Jaim. 2. 3 (here Khādira and Jaim. agree, in opposition to Gobhila, as both texts reckon the *parisamūhana and bhūmyālambhana* to the paribhāṣās); Gobh. III. 3. 2—5 with Jaim. 14. 7—8; Gobh. III. 2. 51 with Jaim. 14. 15; Gobh. III. 3. 9—10 with Jaim. 14. 16—17; Gobh. III. 1. 29 with Jaim. 15. 4—5; Gobh. III. 2. 11 with Jaim. 15. 5; Gobh. III. 2. 12 with Jaim. ib.; Gobh. III. 2. 1—4 with Jaim. 15. 10—11; Gobh. III. 2. 6 with Jaim. 15. 11; Gobh. III. 2. 5, 18, 19 with Jaim. 15. 12; Gobh. III. 2. 29 with Jaim. 15. 16—17; Gobh. III. 2. 52 with Jaim. 16. 5; Gobh. III. 5. 3 with Jaim. 18. 4; Gobh. III. 5. 11, 12, 14 with Jaim. 18. 4—5; Gobh. III. 5. 32—34 with Jaim. 18. 4—6; Gobh. III. 5. 13 with Jaim. 18. 6; Gobh. III. 5. 31 with Jaim. 18. 6; Gobh. III. 5. 7—10 with Jaim. 18. 7—9; Gobh. III. 5. 21—22 with Jaim. 18. 10—12; Gobh. II. 1. 21 with Jaim. 20. 5. Some of these sûtra-sentences are found also in the Khādirasûtra, but usually in a more or less (different wording. So our Jaiminisûtra stands nearer to the Gobhila-than to the Khādirasûtra. This fact does not necessarily compel us to suppose, that it is caused by direct influence of the one on the other Sûtra, as it is more probable that the Sāmavedins from older times possessed a common stock of ritual prescriptions, from which each of them drew.

Whilst the Gobhila and Khādira sūtras stand very near to one another and especially have this fact in common, that both of them acknowledge the Mantrabrāhmaṇa as their authority for the mantras, citing the mantra taken from this source by its pratīka, the Jaiminisūtra in this respect also stands by itself. Many a mantra given by the Mantrabrāhmaṇa is found in the Jaiminisūtra also, but it is here given always sakalapāṭhena and, as is seen from the list of mantras at the end of this edition, never wholly agreeing. Not a few times do we find a mantra in the Jaiminisūtra occuring also in the Mantrabrāhmaṇa, but in a wording agreeing more closely with the recension of the texts of the Black or White Yajurveda. Further it is to be remarked, that our Jaimini text contains some mantras, which as yet are known only from the Kāṭhakagṛhyasūtra.

We may close this Introduction with a few remarks concerning the relation of our Sūtra to some texts outside the Sāmaveda. In the second part of our Sūtra we met with some whole chapters, which, mutatis mutandis, are found also in other texts. So the last four chapters occur also in texts of the Baudhāyanīyas. The gṛhavidhi (II. 6) is found almost verbally agreeing in Baudh. gṛhyapariśiṣṭa (I. 16): the adbhutaśānti (II. 7) occurs, somewhat longer, in Baudh. gṛhyasūtra III. 9, the mantras, as is to be expected, differing: the anaśnatsaṃhitākalpa (II. 8) has its counterpart and perhaps its origin in Baudh. dharmasūtra III. 9., whilst finally the grahavidhi agrees nearly verbally with Baudh. gṛhyapariśiṣṭa I. 15. I, for my part, am inclined to believe—we cannot prove it with absolute certainly—that we must admit the possibility of the Jaiminisūtra having borrowed these parts from Baudhāyana. On the whole, the texts of the Baudhāyanīyas have become very popular in Southern India and have influenced apparently also other texts of the Sāmaveda, especially the still unpublished Pariśiṣṭa, the contents of which are given by Winternitz in his Catalogue of South Indian Manuscripts, London 1902, page 120.

# CONTENTS.


| | | | |
|---|---|---|---|
| I. | 1—4. | *pākayajñatantram.* | पाकयज्ञतन्त्रम् । |
| | 5. | *puṃsuvanam.* | पुंसवनम् । |
| | 6. | *nāndīmukhaśrāddham.* | नान्दीमुखश्राद्धम् । |
| | 7. | *sīmantonnayanam.* | सीमन्तोन्नयनम् । |
| | 8. | *jātakarma.* | जातकर्म । |
| | 9. | *nāmakarma.* | नामकर्म । |
| | 10. | *prāśanakarma.* | प्राशनकर्म । |
| | 11. | *cauḍam.* | चौडम् । |
| | 12. | *upanayanam.* | उपनयनम् । |
| | 13. | *sandhyopāsanam.* | सन्ध्योपासनम् । |
| | 14. | *upākaraṇam.* | उपाकरणम् । |
| | 15. | *utsargaḥ.* | उत्सर्गः । |
| | 16–18. | *vratāni* (*godānam* 18). | व्रतानि (गोदानम् १८) । |
| | 19. | *samāvartanam.* | समावर्तनम् । |
| | 20-22. | *vivāhaḥ.* | विवाहः । |
| | 23. | *sāyaṃprātarhomau; vaiśvadevam.* | सायंप्रातर्होमौ; वैश्वदेवम् । |
| | 24. | *navayajñaḥ.* | नवयज्ञः । |
| II. | 1–2. | *śrāddham.* | श्राद्धम् । |
| | 3. | *aṣṭakāḥ.* | अष्टकाः । |
| | 4. | *aurdhvadehikam.* | और्ध्वदेहिकम् । |
| | 5. | *udakaraṇam, asthisaṃcayanam.* | उदककरणम्, अस्थिसञ्चयनम् । |
| | 6. | *gṛhavidhiḥ.* | गृहविधिः । |
| | 7. | *adbhutaśāntiḥ.* | अद्भुतशान्तिः । |
| | 8. | *anaśnatsaṃhitākalpaḥ.* | अनश्नत्संहिताकल्पः । |
| | 9. | *grahśāntiḥ.* | ग्रहशान्तिः । |

# *ओ३म्*

अथातो ऽग्निं प्रणेष्यन्प्रागुदक्प्रवणमभ्युक्ष्य[१] स्थण्डिलं लक्षणं कुर्यान्मध्ये प्राचीं रेखामुल्लिख्योदीचीं च संहितां पश्चात्तिस्रो मध्ये प्राच्यो ऽभ्युक्ष्याग्निं प्रतिष्ठापयेद्भूर्भुवः स्वरिति लक्षणावृदेषा सर्वत्राथातः पाकयज्ञान्व्याख्यास्यामो हुतो ऽहुतः प्रहुतः प्राशित इति तेषामेकाग्नौ होमो नित्ये यज्ञोपवीतोदकाचमने दर्शपूर्णमासतन्त्राः स्वतन्त्रा वा दक्षिणतो ऽग्नेः पूर्णपात्रमुपनिदधाति स्रुवं चापां पूर्णमुत्तरतो ऽग्नेरिध्माबर्हिर्देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रोक्षामीति[२] प्रोक्षितमुपक्लृप्तं भवति सकृद्यजुषा द्विस्तूष्णीं खादिरः पालाशो वेध्मस्तदलाभे विभीतकतिल्वकबाधकनिम्बराजवृक्षशल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्जं सर्ववनस्पतीनामिध्मः कुशालाभे शूकतृणशरशीर्यबल्वजमुतवनलशुण्ठवर्जं सर्वतृणानि शुक्लाः सुमनसस्तासामलाभे जपारूपकाकुत्थाभण्डीकुरण्डकवर्जं[३] गन्धवत्यो वा सर्ववर्णाश्चतस्र आज्यप्रकृतयो भवन्त्यूधन्यं[४] वा वाह्यं वा दधि वा[५] पयो वा पश्चादग्नेराचमनं त्रिराचामेद्द्विः[६] परिमृजेत्सकृदुपस्पृशेत्पादावभ्युक्ष्य शिरश्च शीर्षण्यान्प्राणानुपस्पृशेद्दर्पे

---

१ प्रणेष्यन् $M^1$ ; प्रणष्यन् $M^2$; प्रणयिष्यन् B text and comm.

२ $M^1$ : देवस्य त्वेति सावित्रेण instead of देवस्य … प्रोक्षामीति.

३ काकुत्थभ° $M^1$.

४ ऊधन्यं B (comm.); उधन्यं B (t); उदन्यं $M^1$; ऊद्धन्य $M^2$ (t) ; उ(?)द्धन्यं $M^2$ (comm.).

५ om. all exc. $M^1$.

६ आचामे° B; आचमे° $M^1$, $M^2$.

उपस्पृश्य पश्चादग्नेरुपसमाहितस्योपविश्य दक्षिणेन पाणिना भूमिमारभ्य जपतीदं भूमेर्भजामह इदं भद्रं सुमङ्गलं परा सपत्नान्बाधस्वान्येषां विन्द ते धनमिति वस्वन्तं रात्रिश्चेदिमंस्तोम्येन तृचेनाग्निं परिसमूहेदाद्यया वा त्रिः प्रस्तरमुपसंगृह्य प्रातिदिशं परिस्तृणाति दक्षिणपुरस्तादुपक्रम्याग्रैर्मूलानि[2]च्छादयन्पश्चाद्वोपस्तीर्योलपराजिभ्यामुपहरेद्दक्षिणोत्तरः[3] सन्धिः ॥ १ ॥

प्रस्तरात्पवित्रे गृह्णाति प्रादेशमात्रे समे अप्रशीर्णाग्रे अनन्तर्गर्भे अङ्गुष्ठेनोपकनिष्ठिकया च धारयन्ननखेन छिनत्ति पवित्रे स्थो वैष्णव्याविति त्रिरूर्ध्वमद्भिरनुमार्जयेद्विष्णोर्मनसा पूते स्थ इति सकृद्यजुषा द्विस्तूष्णीं पात्रस्योपरिष्टात्पवित्रे धारयन्नाज्यमासिच्योत्तरेणाग्निमङ्गारान्निरूह्य तेष्वधिश्रित्यावद्योत्य दर्भतरुणाभ्यां प्रत्यस्य त्रिः पर्यग्नि[4] कृत्वोदगुद्वास्य प्रत्यूह्याङ्गारानुदगग्राभ्यां पवित्राभ्यां त्रिरुत्पुनात्याज्यं च हविश्च प्रणीताश्च स्रुवं च देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति देवो व इति प्रणीताः पुनराहारमाज्यस्य सकृद्यजुषा द्विस्तूष्णीमुत्तरतोऽग्नेः प्रणीताः प्रणीय दर्भैः प्रच्छाद्य दक्षिणतोऽग्नेः प्रस्तरं निधाय प्रस्तरस्योपरिष्टात्पवित्रे निधाय विरूपाक्षं जपत्यों तपश्च तेजश्च सत्यं चात्मा च धृतिश्च धर्मश्च सत्त्वं[5] च त्यागश्च ब्रह्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों महान्तमात्मानमध्यारोहामि विरूपाक्षो ऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णे गृहा अन्तरिक्षे[6] ते विमितं हिरण्मयं[7] तद्देवानां हृदयान्ययस्मये कुम्भे

१ आलभ्य B.

२ उपक्रम्य M², B (c); उपक्राम B (t); उपक्रमः M¹.

३ Thus M²; °श्चाद्वोपारिस्ती° B, M¹.

४ °ग्निं M¹.

५ सत्वं B. सत्यं M¹.

६ गृहान्तरि or ग्रहा° all.

७ हिरण्मयं B (text and comm.) M²; हिरण्ययं M¹.

अन्तः संनिहितानि तानि बलभूश्च बलधा च रक्ष णो[1] मा प्रमदः सत्यं ते द्वादश पुत्रास्ते त्वा संवत्सरेसंवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्यमुपयन्ति त्वं देवानां ब्राह्मणो ऽस्यहं मनुष्याणां ब्राह्मणो वै ब्राह्मणमुपधावति तं त्वोपधावामि जपन्तं मा मा प्रतिजाप्सीर्जुह्वन्तं मा मा प्रतिहौषीः कुर्वन्तं मा मा प्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे समृध्यतां विरूपाक्षाय दन्ताञ्जये ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठायामोघाय कर्माधिपतये नम इति ॥ २ ॥

स्रुवं प्रणीतासु प्रणीय निष्टप्य दर्भैः संमृज्य संमार्गानभ्युक्ष्याग्नावाधाय दक्षिणं जान्वाच्यामेध्यं चेत्किंचिदाज्ये ऽवपद्येत घुणस्त्र्यम्बुका मक्षिका पिपीलिकेत्या पञ्चभ्य उद्धृत्याभ्युक्ष्योत्पूय जुहुयात्परिधीन्परिदधाति मध्यमं स्थवीयसं पश्चाद्दीर्घं मध्यमं दक्षिणतः कनीयसमुत्तरतः संस्पृष्टान्दक्षिणतो ऽग्नेरपां कोशं निनयत्यदिते ऽनुमन्यस्वेत्यनुमते ऽनुमन्यस्वेति पश्चात्सरस्वते ऽनुमन्यस्वेत्युत्तरतो देव[2] सवितः[2] प्रसुवेति[2] त्रिः प्रदक्षिणमग्निं परिषिञ्चेद्देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदत्विति सकृद्यजुषा द्विस्तूष्णीमथेध्ममादाय स्रुवेणाज्यं गृहीत्वाभिघार्याग्नावभ्यादधात्ययं त इध्म आत्मा जातवेदस्तेन वर्धस्व चेध्यस्व चेन्द्धि वर्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति मनसाघारौ जुहोति संततमक्षणया प्रजापतये स्वाहेत्युत्तरं परिधिसन्धिमन्ववहृत्य स्रुवमिन्द्राय स्वाहेति दक्षिणं परिधिसन्धिमन्ववहृत्याघारौ[3] हुत्वाज्यभागौ[3]

---

१ रक्षणो B; लक्षणो M[1]; रक्षनो M[2]. २ only in M[1].

३ आघारैर्हुत्वा M[2]; not found in the other sources.

जुहोत्यग्नये स्वाहेत्युत्तरतः सोमाय स्वाहेति दक्षिणतस्तावन्तरेणाहुतिलोको भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेत्यग्नये ऽग्नीषोमाभ्यामिति पौर्णमास्यामग्नय इन्द्राग्निभ्यामित्यमावास्यायामुत्तरपूर्वामुत्तरपूर्वामाहुतिं जुहोत्यनभिजुह्वदाहुत्याहुतिं प्रत्यक् सौविष्टकृतस्थानान्नित्यो ऽग्निः पुरस्तात्स्विष्टकृदन्ते[1] ऽन्यत्र[1] वपाहोमाज्यहोमाभ्यां न स्विष्टकृतं प्रत्यभिघारयति स्रुवे सकृदाज्यमुपस्तृणाति द्विर्हविषो ऽवद्यति सकृदाज्येनाभिघार्य प्रत्यभिघारयत्यङ्गुष्ठेनाङ्गुलिभ्यां च मांससंहिताभ्यां द्विर्हविषो ऽवद्यति द्विराज्येनाभिघार्य[2] प्रत्यभिघारयति जामदग्न्यानां तद्धि पञ्चावत्तं भवत्यङ्गुल्या तृणकूर्चेन वा एषा होमावृत्सर्वत्र ॥ ३ ॥

सपवित्रं प्रस्तरमादत्ते तस्याग्राणि स्रुवे ऽनक्ति दिव्यङ्क्ष्वेति मध्यमाज्ये ऽन्तरिक्षे ऽङ्क्ष्वेति मूलानि हविषि पृथिव्यामङ्क्ष्वेति प्रस्तरात्तृणं निरस्यत्यायुषे त्वेति प्रस्तरमग्नावनुप्रहरत्यग्नये ऽनुमतये स्वाहेति पश्चात्तृणमनुप्रहरति द्विषन्तं मे ऽभिधेहि तं चैव प्रदह स्वाहेति घृतेनाक्ताः[3] समिध आदधाति समृद्ध्यै स्वाहेति भूमिमारभ्य[4] शीर्षण्यान्प्राणानुपस्पृशेदप उपस्पृश्य द्वादश प्रायश्चित्ताहुतीर्जुहोत्याकूत्यै[5] स्वाहा ॥ कामाय स्वाहा ॥ समृद्ध्यै स्वाहा ॥ ऋचा स्तोमं समर्धय गायत्रेण रथंतरं बृहद्गायत्रवर्तनि स्वाहा ॥ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं स्वाहा ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥ उद्वयं

१ स्विष्टकदन्तेनअन्यत्र $M^2$; स्विष्टकृतंतेअन्यत्र $M^1$; स्विष्टकृतन्तेन्यत्र B.

२ अभिघार्य missing in B, $M^2$.

३ घृताक्ताः B.

४ आलभ्य $M^2$.

५ आक्रत्यै $M^2$, B; आत्मात्यै $M^1$.

तमसस्परि स्वः पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं स्वाहा ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽस्तु वयं स्याम पतयो रयीणां स्वाहा ॥ भूः[१] स्वाहा ॥ भुवः स्वाहा ॥ स्वः स्वाहा ॥ भूर्भुवः स्वः[१] स्वाहेत्यथास्तीर्णान्दर्भानानीय[२] प्रणीतानां च स्रुवस्य चोपरिष्टात्कृत्वापस्रावयञ्जपति[३] सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितमसि मा मे क्षेष्ठा इति प्रतिदिशमप उत्सिञ्चति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तामिति[४] प्राचीनावीती दक्षिणस्यां[५] दिशि मासाः पितरो मार्जयन्तामिति[४] यज्ञोपवीती भूत्वाप उपस्पृश्य प्रतीच्यां दिशि गृहाः पशवो मार्जयन्तामित्युदीच्यां[४] दिश्याप ओषधयो वनस्पतयो मार्जयन्तामित्यूर्ध्वायां[४] दिशि यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तामिति समुद्रं वः प्रहिणोमीत्यपो निनीय[६] समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपि गच्छत । अरिष्टा अस्माकं वीराः सन्तु मा परासेचि नः स्वमिति यदप्सु ते सरस्वतीत्यङ्गुष्ठेनोपकनिष्ठिकया चाक्षिणी विमृजेद्यदप्सु[६] ते सरस्वति गोष्वश्वेषु यन्मधु । तेन मे वाजिनीवति मुखमङ्ग्धि सरस्वतीति दर्भान्परिधींश्चाग्नावाधाय वामदेव्येन शान्तिं कृत्वा त्रिः पर्युक्षेत्सहविष्कं प्रदक्षिणमन्वमंस्थाः प्रासावी-

---

१ The Mss. om the visarga constantly before स्व°.

२ अथास्तीर्णान्दर्भान° B; यथास्तीर्णं दर्भान° M[1]; विस्तीर्णान् दर्भान° M[2].

३ Read अवस्रावयन् ?

४ इति only in M[2].

५ दक्षिणायां M[1], M[2].

६ Thus runs the text in M[1]. In B M[2] the pratīka is not given at the first place, but the Mantra is found immediately Sakalapāṭhena and then, after इति, the act, if above p. 3. l. 15. Thus throughout further on.

रिति मन्त्रान्संनमयेत्पूर्णपात्रमुपनिहितं सा दक्षिणा यथाश्रद्धदक्षिणाः पाकयज्ञाः पूर्णपात्रं वा[1] ॥ ४ ॥

पुंसवनं तृतीये मास्यन्यत्र गृष्टेर्घृते चरुं श्रपयित्वा पृषदाज्यं वा स्थालीपाकवत्संस्कृत्य पुरुषसूक्तेन जुहुयान्माषौ च यवं च पुल्लिङ्गं कृत्वा दधिद्रप्सेनैनां प्राशयेत्प्रजापतिः पुरुषः परमेष्ठी स मे पुत्रं ददात्वायुष्मन्तं यशस्विनं सह पत्या जीवसूर्भूयासमिति न्यग्रोधशुङ्गं फलाभ्यामुपहितं शुक्लरक्ताभ्यां सूत्राभ्यां ग्रथित्वा कण्ठे[2] धारयेद्ध्रुवकुमारायेत्याचक्षते वासो दक्षिणा ॥ ५ ॥

अथातो नान्दीमुखेभ्यः पितृभ्यः पूर्वेद्युर्व्याख्यास्याम आपूर्यमाणपक्षे पुण्ये नक्षत्रे श्वः करिष्यामीति श्वो भूते वान्नं संस्कृत्य शुचीन् श्रोत्रियान्ब्राह्मणाननुमन्त्रयते शुचिः शुक्लमनार्द्रमाच्छाद्य यज्ञोपवीत्यप आचम्य चतुःशुक्लान्बलीन्हरती दधि तण्डुलाः सुरभि शुक्लाः सुमनस इत्यग्न्यायतने प्रागग्रान्दर्भान्संस्तीर्याग्नये सोमाय प्रजापतये विश्वेभ्यो देवेभ्य ऋषिभ्यो भूतेभ्यः पितृभ्यः सर्वाभ्यो देवताभ्यो नम इति हविष्यमन्नं ब्राह्मणेभ्यः प्रदाय दध्ना माषमत्स्यमांसभक्ष्याशनैरित्यपरमथ चतुष्टयमादाय व्रीहियवपुष्पसर्षपाणीति सह तैरेवोदकुम्भमादाय मनः समाधीयतां प्रसीदन्तु भवन्त इत्युक्त्वा सप्रणवं नान्दीमुखाः पितरः प्रीयन्तामित्येवं यथार्थमितरे प्रतिब्रुयुः[3] ॥ ६ ॥

सीमन्तोन्नयनं चतुर्थे मासि षष्ठे ऽष्टमे वा पूर्वपक्षे पुण्ये नक्षत्रे हस्तोत्तराभिर्वा कुर्यात्तिलमुद्गमिश्रं स्थालीपाकं श्रपयित्वान्वारब्धायां जुहुयान्महाव्याहृतिभिर्हुत्वा प्राजापत्यया[4] चाथैनां पश्चा-

---

१ Repetition of the last two words only in B.

२ Thus M²; कर्णे B.

३ B repeats the last three words.

४ प्राजापत्ययर्चा M².

दग्नेर्भद्रपीठ[१] उपवेश्यैरकायां वाहतोत्तरायां तस्यै त्रिः शुक्लया[२] शलल्या प्राणसंमितं सीमन्तं कुर्याच्छुक्लेना मूर्ध्नः प्राणाय त्वापानाय त्वा व्यानाय त्वेत्यथास्या दक्षिणं केशान्तं स्रग्भिरलंकृत्य तथोत्तरं हिरण्यवतीनामपां कांस्यं पूरयित्वा तत्रैनामवेक्षयन्पृच्छेद्धिं भूर्भुवः[२] स्वः किं पश्यसीति परा प्रत्याह प्रजां पशून्सौभाग्यं मह्यं दीर्घमायुः पत्युरिति वासो दक्षिणा हिरण्यं वा ॥ ७ ॥

कुमारे जाते जातकर्म प्राक्स्तनप्राशनाद्व्रीहिं च यवं च जातरूपेणावघृष्येदमन्नमिति प्राशयेदिदमन्नमयं रस इदं प्राणेनामृतं सह पृथिवी ते माता द्यौः पिता जीवाहि शरदः शतं पश्याहि शरदः शतमित्यथैनमभिमन्त्रयते ऽङ्गादङ्गात्संभवसि हृदयादधि जायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतं पश्याहि शरदः शतमित्यथैनं परिददात्यह्ने त्वा परिददाम्यहस्त्वा रात्र्यै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ त्वार्धमासेभ्यः परिदत्तामर्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्तुभ्यः परिददत्वृतवस्त्वा संवत्सराय परिददतु संवत्सरस्त्वा जरायै मृत्यवे परिददात्विति को ऽसि कतमो ऽसीत्याह सं मासं[३] प्रविशासावित्यथास्य गुह्यं नाम ददाति वेदो ऽसीत्यथास्य मूर्धानमुपजिघ्रत्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव पशूनां त्वा हिंकारेणाभिजिघ्रामीत्येवमेव प्रवासादेत्य पुत्राणां मूर्धानमुपजिघ्रति फलीकरणमिश्रान्सर्षपान्दशरात्रमग्नौ जुहुयात् शण्डायेति द्वाभ्यां शण्डाय मर्कायोपवीराय शौण्डिकेर उलूखलो मलिम्लुचो दुणाशि[४] च्यवनो नश्यतादितः[५]

---

१ °पीठमुप° all; cp. Pār. Gṛhs. I. 15. 4. २ The Mss. om the visarga. ३ सम्मासं B, M[1]; शर्मासं M[2] (cp. Mantr. br. I. 5. 14). ४ रूणांशि M[2]. ५ Without visarga the Mss.

स्वाहा । आलिखन्विलिखन्ननिमिषन् किंवदन्त[1] उपश्रुतिरर्यम्णः कुम्भी शत्रुः पात्रपाणिर्निपुणहान्त्रीमुखः सर्षपारुणो नश्यतादितः[2] स्वाहेति दशरात्रं दम्पती सूतकौ भवतस्तस्यान्ते स्नात्वोत्थानम् ॥ ८ ॥

अथातो नामकर्म पूर्वपक्षे पुण्ये नक्षत्रे द्वादश्यां वा पिता नाम कुर्यादाचार्यो वा तमहतेन वाससा समनुपरिगृह्य पिताङ्कनासीत तस्य नामधेयं दद्याद् द्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थमनुनक्षत्रमनुदैवतमनुनामातद्धितमाकारान्तं स्त्रियै यथार्थं[3] वा[4] कुमारयज्ञेषु च नक्षत्रं नक्षत्रदैवतं तिथिमिति यजतेऽष्टावन्या जुष्टा देवता यजतेऽग्निं[5] धन्वन्तरिं[5] प्रजापतिमिन्द्रं वसून्रुद्रानादित्यान्विश्वान्देवानित्येतासु[6] स्विष्टासु[6] सर्वा देवता अभीष्टा भवन्ति ॥ ९ ॥

अथातः प्राशनकर्म पूर्वपक्षे पुण्ये नक्षत्रे ब्राह्मणान्भोजयित्वा हविष्यमन्नं प्राशयेदन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे शं चतुष्पद इति ॥ १० ॥

तृतीये संवत्सरे जटाः कुर्वीत गर्भतृतीय इत्येक उदगयने पूर्वपक्षे पुण्ये नक्षत्रे ब्राह्मणान्स्वस्तिवाच्यापराह्णेऽग्निं प्रणयित्वा दक्षिणतोऽग्नेश्चत्वारि पूर्णपात्राणि निदध्याद्व्रीहियवानामभितो मध्ये तिलमाषाणामाचान्तोदकेऽन्वारब्धे जुहुयान्महाव्याहृतिभिर्हुत्वा

---

१ Thus B; किंवदन्तीम् $M^1$; किंवदन्ती $M^2$. For the two mantras cp. Pār. gṛhs. I. 16. 23.

२ Without visarga the Mss.

३ $M^2$ instead of यथार्थं : अभिधानसमर्थं.

४ In $M^1$ begins a new Khaṇḍa; consequently this recension has one Khaṇḍa more in the first praśna.

५ Thus B $M^1$; अग्निं ध° $M^2$; read अग्निधन्वन्तरी ?

६ Thus B; एतास्वष्टासु $M^1$; एतास्वष्टा $M^2$.

त्रिरूपाद्वेणात्र पञ्चमीं जुहोति सर्वौषधीभि स्फाण्टमुदकमानयन्ति[1] व्रीहियवास्तिलमाषा इत्येतत्सर्वौषधमायमगात्सविता क्षुरेणेति क्षुरमादत्त आयमगात्सविता क्षुरेण विश्वैर्देवैरनुमतो मरुद्भिः । स नः शिवो भवतु विश्वकर्मा यूयं पात स्वस्तिभिः सदा न इत्युष्णेन वाय[2] उदकेनेहीत्युदकमादत्त उष्णेन वाय[2] उदकेनेह्यदितिः केशान्वपत्वित्याप उन्दन्तु जीवस इति दक्षिणं केशान्तमभ्युन्द्यादाप उन्दन्तु जीवसे दीर्घायुष्ट्वाय वर्चस इति तस्मिंस्तिस्रो दर्भपिञ्जूलीरुपदधात्येकां वा धारयतु प्रजापतिरिति धारयेद्धारयतु प्रजापतिः [3]पुनः पुनः सुवसत्रा इत्यूर्ध्वं त्रिरादर्शेन स्पृष्ट्वा येन धातेति क्षुरेण छिन्द्याद्येन धाता बृहस्पतेरग्नेरिन्द्रस्य[4] चायुषे ऽवपत् । तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति येन तत्प्रजापतिर्मरुद्भ्यो[5] गृहमेधिभ्यो ऽवपत् । तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति येन भूयश्चरात्ययं ज्योक् च पश्याति सूर्यम् । तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इत्येवं पश्चात्तथोत्तरतः[6] प्रतिमन्त्रं केशांश्च दर्भपिञ्जूलीशेषांश्चानडुहे गोमये ऽभूमिस्पृष्टे निदध्याद्ब्राह्मणस्य पुरस्तात्पश्चादितरयोर्वर्णयोर्यत्क्षुरेणेति नापिताय क्षुरं प्रयच्छेद्यत्क्षुरेण मम्ला[7] वप्त्रा वपसि नापिताङ्गानि शुद्धानि कुर्वायुर्वर्चो मा हिंसीर्नापितेति यथैषां गोत्रकल्पः कुलकल्पो वाप्लुते प्रायश्चित्तीर्जुहुयादावृतैव स्त्रियाः कुर्यादमन्त्रं समन्त्रं चेत्पश्चाज्जुहुयादथास्य

---

१ The MSS. have mostly स्फाण्ड° (ण्ड and ण्ट are often confounded in Grantha); is the text corrupted from °भिः फाण्टमु° or is स्फाण्ट equal to फाण्ट ? Comm. सह क्वथितं.

२ Thus B, M[1]; वायवुद° M[2]. ३ B M[2] om. पुनः पुनः

४ अग्नेर् alone in M[2]. ५ Thus M[1] M[2]; instead of येन तत् B: यन.

६ Thus M[1], M[2] ; पश्चादथो° B.

७ Thus B; क्षुरेणामम्ला M[1] ; मन्मला M[2].

मूर्धानमारभ्य जपति त्रियायुषं[1] कश्यपस्य जमदग्नेस्त्रियायुषं[1] यद्देवानां त्रियायुषं[1] तत्ते अस्तु[2] त्रियायुषमिति धान्यपल्वले गोष्ठे वा केशान्निखनेत्कुशलीकर्ता पूर्णपात्राणि हरेद्धौर्दक्षिणा ॥ ११ ॥

सप्तमे ब्राह्मणमुपनयीत[3] पञ्चमे ब्रह्मवर्चसकामं नवमे त्वायुष्काममेकादशे क्षत्रियं द्वादशे वैश्यं नाति षोडशमुपनयीत[4] प्रसृष्टवृषणो[5] ह्येष वृषलीभूतो भवतीति तत एनं स्नातमलंकृतमाक्ताक्तं कृतनापितकृत्यमानयन्ति तमहतेन वाससा परिदधीत परीमं सोमेति यथावर्णं परीमं सोम ब्रह्मणा महे श्रोत्राय दध्मसि । यथेमं जरिमा ण[6] याज्ज्योक्[6] श्रोत्रे अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमिति परीममिन्द्र ब्रह्मणा महे राष्ट्राय दध्मसि । यथेमं जरिमा ण[7] याज्ज्योग्राष्ट्रे[7] अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमिति परीमं पोष ब्रह्मणा महे पोषाय दध्मसि । यथेमं जरिमा ण[8] याज्ज्योक्[8] पोषे अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमित्यथैनं पश्चादग्नेः प्राङ्मुखमुपवेश्य यज्ञोपवीतिनमाचार्य आचामयत्याचान्तमुत्थाप्योत्तरतोऽग्नेः प्राचो दर्भानास्तीर्य तेष्वक्षतमश्मानमत्याधाय तत्रैनं दक्षिणेन पादेनाश्मानमधिष्ठापयेदिममश्मानमारोहाश्मेव त्वं स्थिरो भव द्विषन्तमपबाधस्व[9] मा च त्वा द्विषतो वधीदित्यथैनं पश्चादग्नेः प्राङ्मुखमुपवेश्योत्तरत आचार्योऽन्वारब्धे जुहुयान्महाव्याहृतिभिर्हुत्वा वेदाहुतिभिश्च संपातमास्ये भूर्भुवः[10] स्वाहेति प्रतिमन्त्रं भूर्भुवः[10]

---

१ त्र्यायु° B. २ स्तु B. ३ उपनयते B; उपनयेत M². उपनीयत M¹
४ Thus B; उपनीयत M¹; उपनयेत M². ५ प्रस्रस्त° M¹, M².
६ णयाज्ज्यो° B, M¹, M². ७ णयत्ज्यो° B; णयाज्यो° M¹; missing in M². ८ णयात्ज्यो° B; णयाज्यो° M¹; missing in M².
९ अनवाध° M¹ M². १० The Visarga not in the MSS.

स्वाहा भुवो यजूंषि स्वाहा स्वः सामानि स्वाहेति प्राशितमाचान्तमुत्थाप्य नमो वातायेत्येनं[1] प्रदक्षिणमग्निं परिणयेन्नमो वाताय नमो अस्त्वग्नये[2] नमः पृथिव्यै नम ओषधीभ्यो नमो वो ऽदृष्टाय बृहते करोमीत्यधिगन्तरधिगच्छ प्रदातः प्रयच्छासावमुष्मै वेदमित्यथैनं पश्चादग्नेः प्राङ्मुखमवस्थाप्य पुरस्तादाचार्यः प्रत्यङ्मुखस्तावञ्जली कुरुत उत्तरत आचार्यस्तमन्यो ऽद्भिः पूरयेन्निस्रावेणेतरस्य पूरणमथैनं संशास्ति ब्रह्मचर्यमगामुप मा नयस्वेति को नामासीत्यसाविति नामधेयं दद्यात्तत्राचार्यो जपति हिं भूर्भुवः स्वरागन्त्रा समगन्महि प्र सु मर्त्यं युयोतन। अरिष्टाः संचरेमहि स्वस्ति चरतादयमित्यथास्य दक्षिणेन हस्तेन दक्षिणं हस्तं गृह्णातीन्द्रस्ते हस्तमग्रभीद्धाता[4] हस्तमग्रभीत्पूषा हस्तमग्रभीत्सविता हस्तमग्रभीदर्यमा हस्तमग्रभीन्मित्रस्त्वमसि धर्मणाग्निराचार्यस्तवेति प्राणानां ग्रन्थिरसीति नाभिदेशमारभ्य[5] जपति प्राणानां ग्रन्थिरसि मा विस्रसामृत मृत्योरन्तरं कुर्विति दक्षिणमंसमन्ववमृश्य मयि व्रत इति हृदयदेशमारभ्य[5] जपति मयि व्रते हृदयं ते अस्तु मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिस्त्वा नियुनक्तु मयीत्यथैनं परिददात्यग्नये त्वा परिददामि वायवे त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इत्यथैनं संशास्ति ब्रह्मचार्यसि समिध आधेह्यपो ऽशान कर्म कुरु मा दिवा स्वाप्सीरित्यग्नये समिधमाहार्षमिति घृतेनाक्ताः समिध आदधात्यग्नये

१ Cp. page 5 note 6. २ स्त्वग° M¹, M³.
३ [illegible] B : [illegible] M² : आचार्यस्थनम° M¹.

समिधमाहार्षं[1] बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा वर्चसा तेजसा सन्या मेधया प्रज्ञया[2] प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन धनेन समेधिषीय स्वाहा ॥ अप्सरासु या मेधा गन्धर्वेषु च यन्मनः । दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषतां स्वाहा ॥ भूः[3] स्वाहा भुवः[3] स्वाहा स्वः[3] स्वाहा भूर्भुवः[3] स्वः[3] स्वाहेतीयं दुरुक्तादिति मेखलामाबध्नीत इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमाभरन्ती स्वसा देवी सुभगा मेखलेयम् ॥ ऋतस्य गोप्त्री तपसः परस्पी[4] घ्नती रक्षः सहमाना अरातीः । सा मा समन्तादभिपर्येहि भद्रे भर्तारस्ते मेखले मा रिषामेति मौञ्जीं ब्राह्मणस्य मौर्वीं राजन्यस्य मुञ्जमिश्रां तामलीं[5] वैश्यस्य मौञ्जीं वा सर्वेषामथ परिधानानि क्षौमं वा शाणं वान्तरं ब्राह्मणस्यैणेयमुत्तरं रौरवं राजन्यस्याजं वैश्यस्यैणेयं वा सर्वेषां स्वस्त्ययनो ऽसीति दण्डं प्रयच्छेत्प्राणसंमितं पालाशं ब्राह्मणस्य बैल्वं ब्रह्मवर्चसकामस्य नैयग्रोधं राजन्यस्यौदुम्बरं वैश्यस्य पालाशं वा सर्वेषां मातरं प्रथमं भिक्षेताथान्याः[6] सुहृदो[7] भवत्पूर्वया ब्राह्मणो भिक्षेत भवति भिक्षां देहीति भवन्मध्यमया राजन्यो भिक्षां भवति देहीति भवदन्त्यया वैश्यो देहि भिक्षां भवतीति क्षां च हिं च न वर्धयेद्भवत्पूर्वया वा सर्वे प्रायश्चित्तं चेदुत्पद्येत जीवा स्थ जीवयत मेत्येनमप आचामयेज्जीवा स्थ जीवयत मापो नाम स्थामृता नाम स्थ स्वधा

१ आहार्षिम B. २ प्रश्नया B. ३ All Mss. without visarga.
४ परस्पीः and परस्फी M² text and comm.; परिस्त्री B text and comm., M¹. ५ तामली B ; तमलीं M¹, M².
६ Thus only M²; °न्य: B, M¹. ७ सुहृद: M¹, M²; सुहृदं B.

नाम स्थ तासां वो भुक्षिषीय[1] सुमतौ मा धत्त शिवा मे भवत नमो वो ऽस्तु मा मा हिंसिष्टेति भक्षमुपन्याहृतमूर्ध्वं[2] त्रिरात्रात्सावित्रीं प्रब्रूयात्तदहर्वा पश्चादग्नेः पच्छो ऽर्धर्चशः सर्वामित्यनूच्य वेदमारभ्याग्ने व्रतपत इति घृतेनाक्ताः समिध आदधात्यग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । वायो व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । आदित्य व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेति तदेतद्व्रतादेशनं सर्वत्र व्रतसमाप्तावग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहेति मन्त्रान्संनमयेदथैनं संशास्ति ब्रह्मचार्याचार्याधीनः प्रशान्तो ऽधःशायी दण्डमेखलाजिनजटाधारी स्त्र्यनृतमधुमांसगन्धमाल्यवर्जी भवेति त्रिरात्रमक्षारालवणाश्यूर्ध्वं[3] त्रिरात्रात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य पलाशं[4] गत्वा व्याहृतिभिरभ्यज्य स्थालीपाकेनेष्ट्वा यज्ञोपवीतं[5] दण्डमित्युदस्य प्रत्येयाद्गुरोर्दक्षिणा ॥ १२ ॥

सायंप्रातरुदकान्ते पूतो भूत्वा सपवित्रो ऽद्भिर्मार्जयेतापोहिष्ठीयाभिस्तिसृभिस्तरत्स मन्दी धावतीति चतसृभिर्वामदेव्यमन्ते शुचौ देशे दर्भेष्वासीनो दर्भान्धारयमाणःप्रत्यङ्मुखो वाग्यतःसन्ध्यां मनसा ध्यायेदा नक्षत्राणामुदयादुदितेषु नक्षत्रेषु त्रीन्प्राणायामान्धारयित्वा सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वो वा दशावरमथाग्निमुपतिष्ठते ऽग्ने त्वं नो अन्तम इत्यथ वरुणमुपतिष्ठते त्वं वरुण उत मित्र इत्येतयैवावृता प्रातः प्राङ्मुखस्तिष्ठन्नथादित्यमुपतिष्ठत उद्वयं तमस-

---

१ भुक्षीय B ; भिक्षिषीय M¹, M². २ उपव्याहृत° M².

३ Thus B; अक्षारलव° M² ; अद्यरलव° M¹. ४ पालाशं the Mss.

५ Thus M² ; °पवीतदण्ड° B, M¹.

स्परीत्यथ मित्रमुपतिष्ठते प्र मित्राय प्रार्यम्ण इति स यदि सूर्याभ्युदितः सूर्याभिनिम्रुक्तो वा तच्छेषं सावित्रीं मनसा ध्यायेत्सैव तत्र प्रायश्चित्तिः ॥ १३ ॥

श्रावण्यामुपाकरणं प्रौष्ठपद्यां वा हस्तेन त्रीन्प्राणायामानायम्याचम्य[1] सर्वे पुरस्ताज्जपं जपन्ति सह[2] नो[2] ऽस्तु सह नो भुनक्तु सह नो वीर्यवदस्तु मा विद्विषामहे सर्वेषां नो वीर्यवदस्त्विति तेभ्यः सावित्रीं प्रब्रूयाद्यथोपनयने मनसा साममावित्रीं च सोमं राजानमित्यादितश्छन्दांस्यधीत्य यथार्थमक्षतधानानां दध्नश्च नवाहुती जुहोत्यृषीन्देवांश्छन्दांस्यृचो यजूंषि सामान्यृचं साम यजामहे सदसस्पतिमद्भुतं मेधाकारमित्येतासामेव पूर्वाभिः षड्भिः पूर्वं तर्पयेदाचार्यमाचार्यांश्च[3] जैमिनिं तलवकारं सात्यमुग्रं राणायनिं[4] दुर्वाससं[5] च भागुरिं[6] गौरुण्डिं[7] गौगुलविं[8] भगवन्तमौपमन्यवं कारडिं[9] सावर्णिं गार्ग्यं वार्षगण्यं दैवन्त्यमित्येतांस्त्रयोदश[10] धानावन्तं दधिक्राव्ण[11] इत्येताभ्यामभिमन्त्र्य हविःशेषं प्राश्य प्राङ्क प्रधीयत[12] आग्नेये समाप्ते ऽज ऐन्द्रे मेषो गौः पावमाने पर्वदक्षिणा सब्रह्मचारिणश्चोपसमेतान्भोजयेत्सावित्रमहः[13] काङ्क्षन्त उत्सर्गे च पक्षिणीं रात्रिं न मांसमश्नीयान्न श्राद्धं न लोमानि संहारयेन्न स्त्रियमुपेयादृतौ जायामुपेयाद्वर्षाशरदिकमेतद्व्रतमर्धमासमित्येके[14] ॥ १४ ॥

---

१ प्राणानपस्याथाचम्य M[1]; प्राणायामानाचमाचम्य M[2]; प्राणायामानाचम्य B.
२ शंनोअस्तु M[2].   ३ What follows, until the end of the khaṇḍa, is missing in M[2]. आचार्य आचार्यं च M[1].
४ प्राणायनिं B; राणायिणिं M[1].   ५ कुरुवाससं B; दर्वाससं or दर्वासस M[1], cp. Simon, Beitr. zur Kenntnis der Vedischen Schulen, S. 28, note.   ६ भागुरं M[1].
७ गौरिण्डं B, गौरण्डं M[1].   ८ गौङ्गुलवं B; गौर्गलवं M[1].
९ Thus B, but with Tamil-Malayalam *l*, instead of the *d*; गार्ग्य° M[1].   १० Thus B; दैवन्त्रम् M[1].
११ दधिक्राव्णामित्ये° B.   १२ प्राधीयत M[1].
१३ मावित्रांम° the Mss.   १४ वर्षेशर° M[1].

तैपीमुत्सर्गो वेदेषु यथास्वं विश्रमन्तां छन्दांसि चतुरुत्तराणि शिवेन नो ध्यायन्त्वित्युत्सृज्याध्यायानध्यायौ व्रतानि चानुपालयन्तो यथास्वं वेदमधीयीरन्नत ऊर्ध्वमभ्रेषु नाधीयते ॥ १५ ॥

गौदानिकव्रातिकौपनिषदाः[1] संवत्सरास्तेषु सायंप्रातरुदकोपस्पर्शनं नानुपस्पृश्य भोजनं प्रातः सायमुपस्पृश्या समिदाधानादरण्यात्समिधमाहृत्यादध्यादादित्यव्रातिकः संवत्सर एकवासा न वृक्षमारोहेदादित्यं नान्तर्दधीत छत्त्रेण महीमासनशयनाभ्यामुपानद्भ्यां[2] च नोर्ध्वं जान्वोरपः प्रस्नायादन्यत्राचार्यवचनाद्व्रातिके व्रतपर्वादित्यव्रातिके[3] शुक्रियारण्यौपनिषद उपनिषदं श्रावयेत् ॥ १६ ॥

द्वादश महानाम्निकाः[4] संवत्सरा नव षट् त्रय इति विकल्पाः संवत्सरमित्येके[5] पित्रा चेच्छ्रुता महानाम्न्यः[6] संवत्सरं ब्रह्मचर्यं चरेच्छुक्लैकवासा व्रतं तु भूयस्तिष्ठेद्दिवाथासीत नक्तं तस्य कृष्णे भोजनाच्छादने भवत इत्येके शुक्लं चैव[7] परिदध्याद्रागदोषान्न कृष्णां सर्वास्वप्सूपस्पृशेदबुक्ताः[8] शक्वर्य इति नावा न प्रस्नायात्प्राणसंशये तूपस्पृशेदुभयतः[9] अपि वा गाः पाययेत्पशूक्ताः शक्वर्य इति वर्षे नान्तर्दधीत छत्त्रेण प्रति वर्षं निष्क्रामेदेवमस्य चरतः कामवर्षी पर्जन्यो भवति ब्रह्मचर्यान्त एकरात्रमुपोषित अरण्यं गत्वा शैवलमिश्राणामपां कांसं पूरयित्वा तमुपवेश्य समनुपरिगृह्य निमीलितं तिस्र स्तोत्रिया उपगायेत्सपुरीषा[10] उपोत्थायाचार्यो ऽहतेन वाससा मुखमस्य परिणह्येत्प्रदक्षिणमुदपात्रं धारयंस्तिष्ठेदहःशेषं रात्रिमासीत

१ Thus B, M²; गोदा° M¹. २ उपनद्भ्यां च om. M¹.
३ व्रातिके B, M²; व्रातिकस M¹. ४ °नाम्निकाः B, M².
५ °वत्सर इत्येके B, M². ६ °नाम्न्यः the Mss.
७ चैव M¹; तैव (sic) B; M² om. the words शुक्लं......दध्यात्.
८ Thus only B; आपूक्ता M¹; अभुक्ता M². ९ B ins. इति after °स्पृशेद्.
१० Thus all (उपागायेत् M¹); but as the comm. explains उपगायेत् by अध्यापयेत्, the correction उपगापयेत् is probable.

वाग्यतः श्वो भूते ऽरण्यं गत्वाग्निमुपसमाधाय वत्समुपान्वानीय[1] वाम उद्वेष्टयेदुद्यम्य कांसमपोऽभिवीक्ष इति वीक्षेत्स्वरभिवीक्ष इत्यादित्यं ज्योतिरभिवीक्ष इत्यग्निं पशुमभिवीक्ष इति वत्सं समन्या यन्तीत्यपः प्रसिच्य वासः कांसं वत्समित्याचार्यायोपहरेत्स्थालीपाकाद्विश्वामित्रेन्द्रौ महानाम्नीश्च यजत इत्याचार्यं सपरिषत्कं भोजयेद्गौर्दक्षिणा ॥ १७ ॥

द्वादश वर्षाणि वेदब्रह्मचर्यं[2] जननात्प्रभृतीत्येके यावदध्ययनं वा सदा सायं[3] समिदाधानं सायंप्रातर्भैक्षचरणं द्वे त्रिवृती वर्जयेत्त्रिवृतं च मणिं त्रिगुणे[4] चोपानहौ षोडशे गोदानकरणं तत्केशान्तकरणमित्याचक्षते चौडकरणेन मन्त्रा व्याख्याता[5] उपनयनेन व्रतादेशनं न त्विह नियुक्तमहतं वासः सर्वाणि लोमनखानि वापयेच्छिखावर्जमित्यौद्गाहमनिरूप्तकेशः स्नायाद्वनस्पतेरिति वनस्पतीनां स्नानीयेन त्वचमुन्मृद्नीते[6] वनस्पतेस्त्वगसि शोधनि शोधय मा तां त्वाभिहरे दीर्घायुष्ट्वाय वर्चस इति वनस्पतीनां गन्धो ऽसीति स्नात्वानुलेपनेन कुरुते वनस्पतीनां गन्धो ऽसि पुण्यगन्ध पुण्यं मे गन्धं कुरु देवमनुष्येषु तं त्वाभिहरे दीर्घायुष्ट्वाय वर्चस इति वनस्पतीनां पुष्पमसीति स्रजमाबध्नीते वनस्पतीनां पुष्पमसि पुण्यगन्ध पुण्यं मे गन्धं कुरु देवमनुष्येषु तं त्वाभिहरे दीर्घायुष्ट्वाय वर्चस इत्यादर्शो ऽसीत्यादर्श आत्मानं वीक्षेतादर्शो[7] ऽस्या मा दृश्यासन्देवमनुष्या उभये शोभो ऽसि शोभासमहं देवमनुष्येषु रोचो ऽसि

---

१ Thus B ; उपन्वनीय $M^1$ ; उपन्वानीय $M^2$. २ चरेत् ins. $M^1$.
३ Thus B $M^1$; सादामाये $M^2$. ४ Thus B; त्रिगुण $M^1$; त्रिगुणी $M^2$.
५ Thus $M^1$ ; °करणेनमन्त्रव्याख्यातं $M^2$ ; °करणेनव्याख्यातं B.
६ ऋन्मृद्नीते B ; उन्मृध्नीते $M^2$ ; उन्मृत्नीयते $M^1$.
७ Thus B $M^2$ ; अवेक्षेत $M^1$.

रोचासमहं देवमनुष्येष्वित्यपोद्धृत्य स्रजमादेशयेतोक्ता[1] धर्माः संवत्सरेषु गौर्दक्षिणा ॥ १८ ॥

वेदमधीत्य व्रतानि चरित्वा ब्राह्मणः स्नास्यन्संभारानुपकल्पयते ऽहतं वास एरकां स्नानमनुलेपनं सुमनस आञ्जनमादर्शमहते वाससी त्रिवृतं मणिं वैणवं दण्डं शुक्ले उपानहौ नापित उपक्लृप्त उत्तरत उपनिष्ठत्येरकामास्तीर्याहतेन वाससोदग्दशेन प्रच्छाद्य तत्रैनं प्राङ्मुखमुपवेश्य दण्डमप्सु षादयेद्द्विषतां[2] वज्रो ऽसीति मेखलां विस्रंसयेदुदुत्तममिति तां चैवाप्सु षादयेत्केशान्तकरणेन मन्त्रा व्याख्याताः परिवापनं च शिरो ऽग्रे वपते[3] ततः श्मश्रूणि तत इतराण्यङ्गान्यनुपूर्वेण[4] केशश्मश्रुलोमनखान्यश्वत्थस्य मूले निखनेदुदुम्बरस्य[5] वापहतो मे पाप्मेति शीतोष्णाभिरद्भिर्हिरण्यान्तर्हिताभिरेनं स्नापयेच्छिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्योम संदृशीति रोहिण्यां स्नायात्प्रजापतेर्वा एतन्नक्षत्रं प्रजावान्भूयासमिति मृगशिरसि स्नायात्सोमस्य वा एतन्नक्षत्रं सोमेज्या मोपनमेदिति तिष्ये स्नायाद्बृहस्पतेर्वा एतन्नक्षत्रं ब्रह्म बृहस्पतिर्ब्रह्मवर्चसी भूयासमिति हस्ते स्नायात्सवितुर्वा एतन्नक्षत्रं सवितृप्रसूतो भूयासमित्यनूराधासु स्नायान्मित्रस्य वा एतन्नक्षत्रं मित्राणां प्रियो भूयासमिति श्रवणे स्नायाद्विष्णोर्वा एतन्नक्षत्रं यज्ञो वै विष्णुर्यज्ञो मोपनमेदिति तमहतेन वाससा परिदधीत परीमं सोमेति सव्यमग्रे ऽभ्यञ्जीत यशसा मेत्यथ[6] दक्षिणं त्रिवृतं मणिं कण्ठे प्रतिमुञ्चते पालाशं स्वस्त्ययनकामः स्वस्त्ययनो ऽसीति बैल्वं ब्रह्मवर्चसकामो ब्रह्मवर्चसी

---

१ आदेशयत B ; आदेशयेति M² (आदेशयेत comm.); आदेशयते M¹.
२ द्विषतो M¹. ३ वपेत M¹.
४ Thus B ; आनुपूर्व्येण M² ; आनुपूर्वेण M¹. ५ औदुम्बरस्य all.
६ यशसमेतिअथ B ; यशासामेतिअथ M¹ ; यशसैमेतिअथ M².

भूयासमित्यर्केमन्नाद्यकामो ऽर्केवानन्नादो भूयासमिति गन्धर्वो ऽसि विश्वावसुः स मा पाहि स मा गोपायेति वैणवं दण्डमुपादत्त उपानहावादधीत[1] नेत्रे स्थो नयतं मामिति दक्षिणमग्रे प्रतिमुञ्चते तस्य व्रतानि भवन्ति नाजातलोम्न्योपहासमिच्छेद्वर्षति न धावेन्नोपानहौ स्वयं हरेन्न फलानि स्वयं प्रचिन्वीत न प्रतिसायं ग्रामान्तरं व्रजेन्नैको न वृषलैः सह नोदपानमवेक्षेन्न वृक्षमारोहेन्न संक्रममारोहेन्नानन्तर्धायासीत नापरया द्वारा प्रपन्नमन्नमश्नीयान्न शुक्तं न द्विःपक्वं न पर्युषितमन्यत्र शाकमांसयवपिष्टान्नपृथुकफाणितदधिमधुघृतेभ्यो[2] नानर्मणि हसेन्न नग्नः स्नायाच्छुक्ता वाचो न भाषेत जनवादं कलहांश्च वर्जयेत्त्रयः स्नातका भवन्तीति ह[3] स्माहारुणिगौतमो[3] विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति तेषामुत्तमः श्रेष्ठस्तुल्यौ पूर्वौ स्नात्वाचार्यं [4]अयान्मधुपर्कं मे भवानानयत्वित्याचार्यकल्पो वा तस्मै प्राङ्मुखायासीनाय मधुपर्कमाहरेद्विष्टरपाद्यार्घ्याचमनीयान्येकैकमनुपूर्वेण[5] विष्टरमध्यास्ते पाद्येन पादौ प्रक्षालयते मयि श्रीः श्रयतामिति[6] सव्यं पादमग्रे शूद्रा चेन्मयि पद्या[7] विराडित्यथ[7] दक्षिणं मयि वर्च इत्यर्घ्यं प्रतिगृह्णीयादाचमनीयाभिराचामेत्[8] पात्रचमसं विष्टरोपहितमधस्ताद्विष्टरौ संहिताग्रौ भवत एकविष्टर उत्तरतस्तयोर्मध्ये दधि मधु संनिहिते भवतो दध्ना चेद्दधिमन्थो ऽद्भिश्चेदुदमन्थः पयसा चेत्पयस्यस्तं प्रतिगृह्णीयाद्देवस्य त्वेति तं प्रतिगृह्य[9] भूमौ प्रतिष्ठाप्यावघृष्याङ्गुष्ठेनोपकनिष्ठिकया च मह्यं

१ Thus M¹ M²; आददीत B. २ °फाणित° M²; °पाणित° B; °पाणि° M¹. ३ Thus B (only °रुणिगौत°); इति इह स्वाहारुणीगौत° M¹; इति अस्माहरुणिगौत° M². ४ प्रश्रयात् B.

५ Thus M¹; आनुपूर्वेण B; आनुपूर्व्येण M². ६ Thus M²; श्रिय° M; श्रीय° B. ७ Thus B; विद्याविरा इति M¹; विपद्याविराडिति M².

८ Thus B; आचमेत् M²; °चामयेत् M¹.

९ Thus M¹; B M²: तं प्रतिगृह्य देवस्य त्वेति त्रिः प्रभूमौ ।

त्वा यशसे श्रिये ऽन्नाद्याय ब्रह्मवर्चसायेति त्रिः प्राश्नीयाच्छेषमुत्तरतः प्रतिगृह्य[1] ब्राह्मणाय दद्यादभ्युक्ष्य वाब्राह्मणाय गर्ते वा निखनेत्परः स्वधितिपाणिर्गां दृष्ट्वाह गौर्गौरिति[2] तामभिमन्त्रयते गौर्धेनुरित्योमुत्सृजतेति ब्रूयात्कर्तव्या चेत्कुरुतेति ब्रूयाद्गौर्धेनुर्हव्या[3] माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट पिबतूदकं तृणान्यत्त्वित्यथ[4] षडर्घ्यार्हा भवन्त्यृत्विगाचार्यः स्नातको राजाभिषिक्तः प्रियः सखा श्रोत्रियश्चेति तेभ्य आतिथ्यं गां कुर्यात्तामतिथय इति प्रोक्षेत् ॥ १९ ॥

स्नात्वा मातापितरौ परिचरेत्तदधीनः स्यात्ताभ्यामनुज्ञातो जायां विन्देतानग्निकां समानजातीयामसगोत्रां मातुरसपिण्डां ज्यायसः कनीयसीं दूतमनुमन्त्रयते ऽनृक्षरा ऋजवः सन्तु पन्था एभिः[5] सखायो यन्ति नो वरेयम् । समर्यमा सं भगो नो ऽनुनीयात्सं[6] जास्पत्यं सुयममस्तु देवा इति पाणिग्रहणे ऽग्निमाह्रियमाणमनुमन्त्रयते[7] ऽग्निरैतु प्रथमो देवतानां सो ऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयं राजा वरुणो ऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति प्रज्वलितमुपतिष्ठत इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि प्रबुध्यतामियमिति पुरस्तादग्नेर्ब्राह्मणो वाग्यतः प्रत्यङ्मुख उदकुम्भं धारयंस्तिष्ठेद्दक्षिणतो ऽग्नेः शमीपलाशमिश्रान्लाजाञ्छूर्पे माता धारयेन्मातुरभावे तन्मात्री प्रत्यगग्नेरेरकां तेजनीं[8] वान्यद्वैवंजातीयं[9] संवेष्ट्य निदध्याद्यथा

---

१ परिगृह्य M². २ Thrice गौर् M¹. ३ Thus B M¹ (cp. the comm.) ; भव्या M². ४ After इति (which is missing in B M²) M¹ has : ओमुत्सृजेत् तामुत्सृजेत्. ५ Thus all (instead of येभिः), also the comm. ६ Thus all (instead of निनीयात्) also the comm.

७ °ह्रीयमाण° M¹ B ; °हार्यमाणा° M². ८ Thus B ; तेजनं M² ; तेजनीयं M¹. ९ वा अन्यदैवजा° M¹.

प्रसार्यमाणं[1] पश्चार्धं बर्हिषः प्राप्नोत्यथास्य[2] वाससी प्रोच्यानुमन्त्र्य ददाति[3] या अकृन्तन्नवयन्या अतन्वत याश्च देवीरन्तामभितो ऽददन्त। तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वास इति तां अयादिमामेरकां दक्षिणेन पादेनाभिजहीति प्र मे पतियानः पन्थाः कल्पतामित्यजपत्यां[4] स्वयं जपेत्प्रास्या इति दक्षिणत एरकायां भार्यामुपवेश्योत्तरतः पतिरुभावन्वारभेयातां स्वयमुच्चैर्जुहुयाज्जाया-यामन्वारब्धायां महाव्याहृतिभिर्हुत्वा या तिरश्चीति सप्तभिर्जुहोति संपातं प्रथमया मूर्धन्यासिञ्चेद्या[5] तिरश्ची निपद्यसे ऽहं विधरणी इति। तां त्वा घृतस्य धारया संराधा राधयामसि संराधायै स्वाहा॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु। मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज प्रजां पश्यन्ती सुम-नस्यमाना स्वाहा॥ अन्वद्य नो ऽनुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनस्तत्करोतु समृध्यतां स्वाहा॥ द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयतस्ते पुत्रान्सविताभिरक्षतु। आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात्स्वाहा॥ अप्रजस्तां पौत्रमृत्युं[6] पाप्मानमुत वाघम्। शीर्ष्णः[7] स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशं स्वाहा॥ यानि कानि च पापानि सर्वाङ्गेषु तवाभवन्। पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमं स्वाहा॥ प्रजापत इत्येका॥ २०॥

अथास्या दक्षिणेन पाणिना दक्षिणं पाणिं गृह्णाति प्रहस्तं पुंस

१ °माणः $M^1$. २ Before अथ $M^1$ ins. इति. ३ दधाति $M^1$ $M^2$.
४ Thus B; कल्प्यतामित्य° $M^2$; कल्प्यतमियमित्य° $M^1$.
५ Thus $M^2$; मूर्न्यासि° B; मूर्धासि° $M^1$. ६ Thus B $M^2$; पौत्रं मृत्युं $M^1$. ७ Without the visarga B $M^2$; शीर्ष्णि $M^1$.

अङ्गुली स्त्रियः साङ्गुष्ठं मिथुनकामो[१] गृह्णामि[२] ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत् । भगो ऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ सोमो ऽददद्गन्धर्वाय गन्धर्वो ऽददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो ऽग्निष्टे पतिस्तुरीयो[३] ऽहं मनुष्यजा इत्युपनयनावृताश्मानमधिष्ठापयेत्स्त्रीवत्[४] उत्तरपुरस्तादग्नेर्भार्यया संप्रेक्ष्यमाणो जपत्यघोरचक्षुरपतिघ्नी म[५] एधि शिवा पतिभ्यः[६] सुमनाः सुवर्चाः । जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मङ्गलीः पतिलोकमाविश शं न[७] एधि[७] द्विपदे शं चतुष्पदे ॥ तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति । या न ऊरू उशती विस्रयाते यस्यामुशन्तः प्रहरेम शेफम् ॥ अमो ऽहमस्मि सा त्वं सामाहमस्म्यृक्त्वं मनो ऽहमस्मि वाक्त्वं द्यौरहं पृथिवी त्वं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै मामनुव्रता भव सहशय्या मया भवामावित्यथास्या नाम गृहीत्वाग्निं परिक्रमेयातामीत्वमस्यूर्क्त्वं माता नाम सा मामेहि सह प्रजया सह रायस्पोषेणेति तस्यां प्रत्याव्रजितायां भ्रातान्यो वा सुहृदभिघारितान्लाजान्छूर्पादञ्जलिनोपघातमञ्जलावावपेदुपस्तीर्णाभिघारितान्कृत्वा तानितराग्नौ जुहुयात्कन्यलेयं नार्यर्यमणमिति कन्यला पितृभ्यः पतिलोकं यतीयमव दीक्षामयक्षत स्वाहा ॥ इयं नार्युपब्रूते ऽग्नौ

१ Here follow in M[1] the words (which are neither given by B M[2] nor explained in the comm.): मऽयमां परिवर्जयेत्

२ Thus B M[2]; गर्भाणामि M[1].   ३ तुरियो B; तुर्यो M[1] M[2].

४ M[1] inserts here the mantra इममश्मानम with ūha.

५ Thus M[2]; °घ्नामयेधि B; °घ्नामेति M[1].   ६ पशुभ्यः all Mss. of the text; the comm., however, has पतिभ्यः

७ Thus B; नयेति M[1]; नो भव M[2].

लाजानावपन्ती । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ अर्यम्णं नु देवं कन्याग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुतः स्वाहेति होमान्तेषु जपति चतुर्विंश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इति तूष्णीं धारिका कामाया-वपेच्चतुर्थं दक्षिणं शूर्पपुटं काम इत्याचक्षत उत्तरपुरस्तादग्नेः सप्त पदान्यभ्युत्क्रमयेदेकमिष इति प्रतिमन्त्रमेकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि रायस्पोषाय विष्णुस्त्वान्वेतु । चत्वारि मयोभवाय विष्णुस्त्वान्वेतु । पञ्च प्रजाभ्यो विष्णुस्त्वान्वेतु । षडृतुभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदी भवेति सप्तमे प्राचीमवस्थाप्योदकुम्भेन मार्जयेरन्नापोहिष्ठीयाभिस्तिसृभिः प्रेक्षकाननुमन्त्रयते सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति प्रेक्षयेद्ध्रुवमरुन्धतीं सप्त ऋषीन्पश्यामीति प्रतिजानानां ध्रुवो ऽसीति ध्रुवमुपतिष्ठते ध्रुवो ऽसि ध्रुवाहं पतिकुले भूयासममुष्येति पतिनाम गृह्णीयादसावित्यात्मनो ऽरुन्धतीमरुन्धत्यरुद्धाहं[१] पत्या भूयासममुनेति पतिनाम गृह्णीयादसावित्यात्मनः ॥ २१ ॥

पूषा त्वेत इति प्रस्थितामनुमन्त्रयते पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासीति स्वं कुलं प्राप्तां कल्याणशीलाः कल्याणप्रजाः समवजीर्णाः प्रत्यवरोपयन्तीह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि । एना पत्या तन्वं संसृजस्वाथाजीव्री विदथमावदासीति प्रत्यवरोप्यानडुहे चर्मण्युत्तरलोमन्युपवेशयेदिह[२] गावो निषीदन्त्विहाश्वा इह पुरुषाः । इहो सहस्रदक्षिणो ऽभि[३] पूषा

१ After अरुन्धतीं B ins.: दृष्ट्वा उपतिष्ठते अरुन्धतीति. २ Thus M¹ M²; °लोमन्युप° B. ३ Thus B; °दक्षिणा अभि M¹; °दक्षिणोपि M².

निषीदत्विति कुमारमुपस्थ आधाय शकलोटानावपेत्फलानि वोत्थाप्य कुमारमन्वारब्धायां जुहुयादिह धृतिरित्यष्टाभिः[1] स्वाहाकारान्तैरिह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व । मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमस्वेति[2] त्रिरात्रमक्षारालवणाशिनौ[3] ब्रह्मचारिणावधः संवेशिनावसंवर्तमानौ[4] सह शयातामूर्ध्वं त्रिरात्रात्संभवतो[5] निशायां जायापतिकर्मण्यं प्रायश्चित्तीर्जुहुयादग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्या अपजहि स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्या अपजहि स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्या अपजहि स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्या अपजहि स्वाहा । अग्ने वायो सूर्य चन्द्र प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तय स्थ ब्राह्मणो वो नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्या अपहत स्वाहेति स्थालीपाकादग्निं प्रजापतिं चेष्ट्वा संपातांश्चमस आनीय स्रोतांस्याङ्क्ष्वेत्येनां[6] ब्रूयान्नाभिं प्रथमं ततो यान्यूर्ध्वं ततो यान्यवाञ्च्यूर्ध्वमर्धरात्रात्संवेशनं विष्णुर्योनिं कल्पयत्वित्येतेन[7] तृचेन[7] विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ हिरण्ययी अरणी यं निर्मन्थतामश्विनौ । तं ते गर्भं दधाम्यहं दशमे

---

१ Thus M[1] M[2]; इत्येताभि B. २ Before इति M ins. स्वाहा.
३ Thus B; अक्षारलवना° M[1] M[2]. ४ Thus B; अथस्संवर्त° M[1]; M[2] defective. ५ संभवतः B. ६ अङ्क्ष्वेति B. ७ विष्णु°...तृचेन om. M[1].

मासि सूतवा[१] इत्यृताव्रतावेवमेव संवेशने[२] हुत्वाचार्याय गां दद्याद्दर्शने[३] ब्राह्मणेभ्यो गां दद्यात् ॥ २२ ॥

सायंप्रातर्होमे ऽग्नय इति प्रथमामाहुतिं जुहोति प्रजापतय इत्युत्तरामेवं प्रातरग्निस्थाने सूर्यः सायंप्रातरशनस्य बली वर्धयित्वा पूर्वस्मादग्नौ जुहोत्यग्नये स्वाहा सोमाय स्वाहा धन्वन्तरये[४] स्वाहा द्यावापृथिवीभ्यां स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः स्वाहा प्रजापतये स्वाहेति मनसोत्तरां तत एवोत्तरतो ऽग्नेर्बलिं[५] हरति[५] ये हर्षणा वेपना स्फातिमाहरा वातस्य भ्राजमनुसंचरन्ति । तेभ्यो बलिमन्नकामो हराम्यन्नं पयस्वद्बहुलं मे अस्त्वित्येवमशनायत्यायस्थाने[६] मृत्योरधिष्ठानाय स्वाहेति शेषस्य बलिहरणं प्रदक्षिणं गृह्याभ्यो देवताभ्यो बलिं नयामि तन्मे जुषन्तां ता मा पान्तु ता मा गोपायन्तु ता मा रक्षन्तु ताभ्यो नमस्ताभ्यः स्वाहेत्युदधाने मध्ये ऽगारस्योत्तरपूर्वार्धे शयने देहल्यां[७] संवरणे ब्रह्मायतन[८] एतेष्वायतनेषु[८] शेषं धन्वन्तरये निनयेत्सदा गृहेषु स्वस्तिवाचनं सा महाशान्तिरित्याचक्षते ॥ २३ ॥

नवेन यक्ष्यमाणः पुराणेनाग्रे यजेताग्निधन्वन्तरी प्रजापतिमिन्द्रं तिस्रश्च नवाहुतीर्नवेन यजेत शरदि व्रीहीणां वसन्ते यवानां वर्षासु श्यामाकानामैन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्चरव एकचरुर्वोक्त एवोपस्तरणाभिघारणे द्विर्हविषो ऽवद्यत्यथ प्राश्नीयाद्भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नो मयोभूः पितो

[१] Thus $M^2$; सूतवं (इति) B; सूतवाह (इति) $M^1$. [२] Thus B $M^1$; °शनं $M^2$. [३] Thus B; आदर्शने $M^1$ $M^2$. [४] °न्तरे the MSS.
[५] Thus $M^2$ only; बलीमाहरति B; बलीन् हरति $M^1$. [६] Thus $M^1$ $M^2$; आयु° B. [७] देहिन्यां B; देहिल्यां $M^1$; देवड्यां $M^2$.
[८] ब्रह्मायनेषु एतेष्व° $M^1$; ब्रह्मायतनेषु तेष्व° $M^2$; ब्राह्मणायतने एतेष्व° B.

आविशस्व शं तोकाय तनुवे स्योन इत्येतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि मनावचर्कृषुः[1] । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति यवस्य प्राश्नीयादग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणीरिति श्यामाकस्य प्राश्नीयात्प्राश्नीयात्[2] ॥ २४ ॥

॥ इति जैमिनिसूत्रं पूर्वम् ॥

श्राद्धं करिष्यन्तः स्नाताः शुचिवाससस्तिलैर्यवैस्त्ववकीर्य[3] सव्यमाचरन्तो ऽन्नमुपसाधयेरन्हविष्यैरुपसिच्यैवैवं दद्याद्यद्यद्दद्यात्तत्तद्धविष्यैरुपसिच्यैव हविष्या इति तिलानामाख्या दन्तधावनं स्नानीयानि पाद्यमानीय प्रथमोद्धृतं ब्राह्मणांस्त्र्यवदातानुपवेशयत्या मे गच्छन्तु पितरो भागधेयं विराजाहूताः[4] सलिलात्समुद्रियात्[5] । अक्षीयमाणमुपजीवतैतन्मया दत्तं स्वधया मदध्वमित्युपमूललूनान्दर्भान्विष्टरान्प्रसव्यान्कृत्वा ब्राह्मणेभ्यः प्रदद्यादेतत्ते पितरासनमसौ ये च त्वात्रानु तेभ्यश्चासनमित्येवं पितामहायैवं प्रपितामहाय हविष्योदकं तिरः पवित्रं गन्धान्सुमनसश्च दद्यादन्नमवत्त्वा घृतेनाभिघार्य दर्भान्परिस्तरणीयानिति[6] तदादायाग्नौ करिष्यामीति ब्राह्मणाननुज्ञाप्य प्राग्दक्षिणामुखो ऽग्निं प्रणयित्वा त्रिर्धून्वन्प्रदक्षिणमग्निं[7] परिस्तृणाति प्राचीनावीती त्रिः प्रसव्यं त्रिः पर्युक्षेत्प्रदक्षिणं प्राचीनावीती त्रिः प्रसव्यमौदुम्बर इध्मः परिधयो भवन्ति मेक्षणं च पवित्रं संस्कृत्या-

१ °वर्चाक्रिषुः M[2]; °विचाक्रिषुः B; M[1] defective. २ The repetition acc. to the comm.; the MSS. do not repeat.

३ Thus M[2]; अकीर्य B M[1]. ४ °हुताः MSS. ५ Thus M[2] and the comm.; समृद्यात् M[1]; समुद्रात् B. ६ Thus M[1]; B M[2]: °स्तरणीयानीति ७ धुन्वन् B (comm.: धून्वन्).

अभुत्पूयाग्नौ पवित्रं प्रास्य मेक्षणेन जुहोत्यग्नये कव्यवाहनाय स्वधा नमः स्वाहा सोमाय पितृमते स्वधा नम स्वाहेति यज्ञोपवीती भूत्वाप उपस्पृश्य यमायाङ्गिरस्वते स्वाहेति मेक्षणमग्नावनुप्रहरति नमस्कारान्कृत्वा यथादैवतं त्रिः पर्युक्षेत्प्रदक्षिणं प्राचीनावीती त्रिः प्रसव्यं सव्यञ्जनमन्नं पात्रेषु वर्धयित्वामासु पक्वमिति क्षीरं घृतं वासिञ्चत्यामासु पक्वममृतं निविष्टं मया प्रत्तं स्वधया मदध्वमिति वर्धितान्यादिशत्येतद्वः[1] पितरो भागधेयं पात्रेषु दत्तममृतं स्वधावत् । अक्षीयमाणमुपजीवतैनन्मया प्रत्तं स्वधया मदध्वम् ॥ अमृता वागमृता वाचो अग्ने वाचो ऽमृत[2] त्वं त्रिवृतैकधामा[3] । एभिर्मत्प्रत्तैः स्वधया मदध्वमिहास्मभ्यं वसीयो ऽस्तु देवाः ॥ अयं यज्ञः परमो यः[4] पितृणां पात्रदेयं पितृदैवत्यमग्ने । वाक्च मनश्च पितरो नः प्रजानीमाश्विभ्यां प्रत्तं स्वधया मदध्वम् ॥ य इह पितरः पार्थिवासो य अन्तरिक्ष[5] उत ये समुद्रियाः[6] । ये वाचमाप्त्वा अमृता बभूवुस्ते[7] ऽस्मिन्सर्वे[7] हविषि मादयन्ताम् ॥ एषा व ऊर्गेषा वः स्वधा चामत्त च पिबत च मा च वः क्षेष्ट । स्वधां वहध्वममृतस्य योनिं यात्र स्वधा पितरस्तां भजध्वम् ॥ येह पितर ऊर्ग्देवता च तस्यै जीवेम शरदः शतं वयम् । ज्योतिष्मद्धत्ताजरं म आयुरित्यथैतानि ब्राह्मणेभ्य उपनिक्षिप्य स्वाङ्गुष्ठेनानुदिशत्यमुष्मै स्वधामुष्मै स्वधेति यन्मे ऽप्रकामा इति भुञ्जतो ऽनुमन्त्रयते यन्मे ऽप्रकामा उत वा प्रकामा समृद्धे[10] ब्राह्मणे ऽब्राह्मणे वा । य स्कन्दति निर्ऋतिं वात उग्रां येन नः प्रीयन्ते

१ In B $M^2$ first are given all the mantras, then follow the words : व° आदि°. २ मृतत्वं B ; अमृतत्वं $M^1$ ($M^2$ defective). ३ त्रिविर्धक° M ; त्रिवृदंक° B ($M^2$ defective). ४ यं the MSS. ५ Thus B ; आन्तरिक्ष्या $M^1$; अन्तरिक्ष्यौ $M^2$. ६ समुद्रा : $M^2$ ; समृद्धया $M^1$ ; समुद्राः B. ७ Thus $M^2$ ; ते अस्मि° $M^1$ ; तस्मि° B. ८ माचवक्षेष्ट $M^2$ ; मावक्षेष्ट B ; माध्वक्षेषु $M^1$. ९ ब्राह्मणस्यांगुष्ठेन $M^1$. १० Thus B ; ममृद्धे $M^2$ ; समृध्ये $M^1$.

पितरो देवताश्च । वायुष्टत्सर्वं शुन्धतु तेन शुद्धेन देवता मादयन्तां तस्मिञ्छुद्धे पितरो मादयन्तामित्यक्रान्समुद्र इत्याश्वं गीत्वा संपन्नं पृष्ट्वाथाचामयेद्यज्ञोपवीती[1] भूत्वाभिरमन्तां[2] भवन्त इत्युक्त्वा प्रदक्षिणं कृत्वा यन्मे रामेति गच्छतो ऽनुमन्त्रयते यन्मे रामा शकुनिः श्वापदश्च यन्मे ऽशुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तेन पूतेन देवता मादयन्तां तस्मिन्पूते पितरो मादयन्तामिति ॥१॥

शेषमनुज्ञाप्य प्रत्येत्य प्राग्दक्षिणायतं चतुरश्रं गोमयेनोपलिप्यापहता असुरा रक्षांसि पिशाचाः पितृषद इति मध्ये रेखां काष्ठेनोल्लिख्य ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुनोत्वस्मादित्युल्मुकं[3] दक्षिणतो निदधात्यनुलेखं दर्भानास्तीर्योदपात्रेणाचामयत्याचाम पितरसौ ये च त्वात्रानु ते चाचामन्त्वित्येवं पितामहायैवं प्रपितामहाय तेषु पिण्डान्निदधात्यनुनामापहस्तेनैतत्ते पितरसौ ये च त्वात्रानु तेभ्यश्च स्वधा नम इत्येवं पितामहायैवं प्रपितामहाय नामान्यजानतः पितरेतत्ते पितामहैतत्ते प्रपितामहैतत्त इति ब्रूयादजानत इदं पितृभ्यः पृथिवीषद्भ्य इदं पितामहेभ्यो ऽन्तरिक्षसद्भ्य इदं प्रपितामहेभ्यो दिविषद्भ्य इत्यत्र पितरो मादयध्वं यथाभागमावृषायध्वमित्युदगावृत्या तमितोरासीतामीमदन्त पितरो यथाभागमावृषायिषतेति जपित्वा पूर्ववदाचामय्य[4] नीवीं[5] विस्रंस्य[6] नमस्कारान्कृत्वा यथादैवतमेतद्वः पितर इति वस्त्राण्यादिशत्यूर्णास्तुकां दशाम्बरं वा एतद्वः पितरो वासो गृहाणः पितरो दत्ताधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथेह

१ Thus B ; आचामेत् M²; आचामइति M¹. २ M¹ has after भूत्वा the words: अप उपस्पृश्य. ३ प्रणुनोत्व° the MSS. ४ आचम्य the MSS. ५ Thus all (निवीं B). ६ Thus M²; विस्रस्य B ; विमृश्य M¹.

पुरुषो ऽसदित्यञ्जनाभ्यञ्जने ददात्याङ्क्ष्वासावित्यभ्यङ्क्ष्वासावितिगन्धान्सुमनसश्च दद्यान्नमो वः पितर इति षड्भिर्नमस्कारैरुपतिष्ठते नमो वः पितरो रसाय[1] नमो वः पितरः शुष्माय[1] नमो वः पितरो जीवाय[1] नमो वः पितरो घोराय[1] नमो वः पितरो बलाय[1] नमो वः पितरो मन्यवे स्वधायै च पितरो नमो व इत्यूर्जं[1] वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं[2] स्वधा स्थ तर्पयत मे पितॄनित्यपः प्रसिच्य[3] मा मे क्षेष्टेत्यभिमन्त्र्य[4] मा मे क्षेष्ट बहु मे पूर्तमस्तु ब्रह्मणो मे जुषन्तामन्नमन्नम् । सहस्रधारममृतोदकं मे पूर्तमस्त्वेतत्परमे व्योमन् ॥ देवाश्च पितरश्चैतत्पूर्तं मे अत्रोपजीवन्ताम् । अक्षीयमाणमुपजीवतैनन्मया प्रत्तं स्वधया मदध्वमिति ये समानाः सुमनस[5] इति प्रदक्षिणं कृत्वा ये समानाः सुमनसो[6] जीवा जीवेषु मामकाः । तेषां श्रीर्मयि कल्पतामस्मिँल्लोके शतं समा इत्यामयावी पिण्डान्प्राश्नीयादन्नाद्यकामो वाग्नौ वा संक्षेपयेदप्सु[7] वाभ्यवहरेयुरजं गां ब्राह्मणं वा प्राशयेयुः[8] शेषस्य[9] प्राश्नीयान्न चानतृप्तिं गच्छेत् ॥२॥

ऊर्ध्वमाग्रहायण्यास्त्रयो ऽपरपक्षास्तेषामेकैकस्मिन्नेकैकाष्टका भवति शाकाष्टका मांसाष्टकापूपाष्टकेति तत्र शाकमांसापूपानि हवींष्योदनं च तेषां हविषां स्थालीपाकावृताग्नौ जुहुयादष्टकायै स्वाहा एकाष्टकायै स्वाहा अष्टकायै[10] सुराधसे स्वाहा संवत्सराय परिव-

१ In the following passage the recension of M[1] is received, after each dative we find in B M[2] partly abbreviated, partly corrupt, the words: स्वधायै च पितरो नमो वः; M[1] has this addition only after the six namaskāramantras and ins. after इति the word: पर्यान्तेषु. Did the text run originally: नमस्कारैरुपतिष्ठते नमो वः...स्वधायै च पितरो नमो व इत्यन्तैः ? २ परिस्रुतं the MSS. ३ अप: प्रसिच्य om. M[1]. ४ क्षेष्टेत्यामन्त्र्य M[1]. ५ Thus M[1]. ६ Here M[1]: समनसो: सुम° B M[2] (also the comm.). ७ संक्षापयेत् M[1]. ८ Thus M[1]: °शयेत् B M[2]. ९ न ins. M[1]. १० Thus M[1]; °काय B M[2].

त्सरायेदावत्सरायेद्वत्सरायावत्सराय[१] कृणुता नमोभिः। त्वया वयं सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम स्वाहेति हुत्वोपतिष्ठत एहि भगेहि भगेहि भगेति[२] मध्यमायां गां कारयेत्तामष्टकायै प्रोक्षेत्तस्यास्त्रीणि सव्यान्युपोद्धरति पार्श्वमपघनीं[३] श्रोणीमिति[४] श्वोभूते श्राद्धमन्वष्टक्यं तदहर्वा ब्राह्मणान्हविरर्हानुपवेश्य तांस्तर्पयित्वा तस्मादग्नेर्दक्षिणतः षडग्नीन्प्रणीय तेषामेकैकस्मिन्नेकैकां कर्षूं खानयेदायामेन प्रादेशमात्रीं पार्थिवेन त्र्यङ्गुलामवाग्वैकाङ्गुलामिति तासु पिण्डान्निदधात्यनुनामापहस्तेन मन्त्राः पितृभ्य उपकर्षति[५] पार्श्वानि स्त्रीणां तत्राध्वर्यवः केचिदधीयते मध्यमं पिण्डं पत्नी प्राश्नीयात्प्रजाकामस्य तथा श्राद्धस्य स्थालीपाकं वा श्राद्धस्य स्थालीपाकं वा[६] ॥३॥

आहिताग्नेः शरीरनाशे त्रीणि षष्टिशतानि पलाशत्सरूणामाहृत्य तैः प्रतिकृतिं कुर्यात्कृष्णाजिने ऽशीत्यर्धं शिरसि दध्याद्ग्रीवायां तु दशैव तु बाह्वोश्चैव शतं दध्यादङ्गुलीषु पुनर्दश उरसि त्रिंशतं दध्याज्जठरे विंशतिं तथोर्वोश्चैव शतं दध्यात् मेढ्रे[७] चापि दशैव तु जानुजंघयोस्त्रिंशतं दध्यात् दश पादाङ्गुलीष्वपि[८] इत्येतावन्तीह[९] पुरुषस्य शरीराणि भवन्तीति विज्ञायते मध्ये शरीरं सतीशरीरमुप्तकेशं[१०] निकृत्तनखं प्रक्षालितं[११] चितामारोपयन्त्यत्र पात्राण्यपि[१२]

१ Uncertain ; before इद्वत्सराय B inserts: इदुवत्सराय : moreover B has: इद्वत्सरायायवत्सराय : after इद्वत्सराय M² has: वत्सरायायवत्सराय, M¹ : वनसंवत्सराय. Five are required acc. to the comm. २ Thus B ; M² only twice एहि भग. M¹ twice and at the end : भगोत्रिः ३ Thus B : अपघ्नीं° M² ; अपगनिं M¹. ४ Thus B M² ; श्रौणिमिति M¹. ५ Thus B ; कर्षन्ति M² ; पितृभ्योवकर्षति M¹. ६ The repetition of the closing words alone in M¹. ७ मेध्रे B (in the comm., this passage is missing in the text); मेद्र M¹. ८ अपि not in M¹. ९ Thus all MSS. The correct reading is no doubt : एतावन्ति ह. १० मति B M¹ ; सती comm. ; instead of my restitution : उप्तकेश°, the MSS. have लुप्त°. The text probably is corrupt. Are we to read : सति शरीर उप्त° ? ११ Not in B. १२ अप B instead of अपि.

चिनोति तस्यामेनमादधाति[1] तस्य नासिकयोः स्रुवौ निदध्यादित्येतेनानुवाकेन य एवंवित्स्यात्स यदोपतापी स्यादिति[2] पूर्वमेव चतुर्गृहीतं गृहीत्वान्यं[3] यथासंभवमास्ये हिरण्यशकलमाधायाग्नीनुपोह्य[4] सामभिरुपतिष्ठते नाके सुपर्णमिति ग्राम्यं गेयमुदिते धूमे त्वेषस्ते धूम ऋण्वतीत्यग्नौ समारूढे ऽग्ने मृड महं[5] असीत्येतयोरन्यतरेण पराक्[6] पराग्वा[7] असौ लोक इति ब्राह्मणम् ॥४॥

आहिताग्नेश्चेत्पूर्वं जाया म्रियेत तां निर्मन्थ्येन दहेत्सांतपनेन वा श्मशानकृतं स्वकृतमनिरिणमपसलवक्रोदकं[8] कृत्वा यत्र वौषधयो जायन्ते तत्र शरीरं दग्ध्वोदककरणाय यान्त्यनवेक्षमाणा न वाहिनीषु कुर्वन्ति तेषां योयः पश्चाज्जातः ससो[9] ऽग्रं कुर्यादुपकूलमकूले कूपं खात्वा सव्यहस्तस्यानामिकया सकृदुदकं प्रोहति प्रेतस्य नामकरणेन वाहिनीषु चेदुद्ग्रथ्य[10] केशान्निमज्यैकाञ्जलिं दत्त्वोपसंगृह्य केशानुल्मुकस्याग्निमारभेताग्ने शूकाहे[11] पापं मे ऽपहतेति शमीमारभेत शम्यसि शमय मे पापमित्यश्मानमारभेताश्मासि स्थिरो ऽस्यहं स्थिरो भूयासमिति तूष्णीं गोमयं कृतोदकं दक्षिणामुखमासीनं तमनुगन्तार उपविशन्ति तानितरः कल्याणीभिर्वाग्भिः प्रत्याहोपास्तमनवेलायां ग्रामं[12] प्रविशन्ति तां रात्रिमेकमाषेण वसन्ति शान्त्या वा श्वो भूते क्षीरोदके संसृज्य शरीराण्यवसिञ्चत्यजशृङ्गेण गोशृङ्गेण[13] मृण्मयेन कोशेन वा[14] तृतीयायां गन्धौषधीभिः संसृज्य शमीशाखया पलाशशाखया वासंह्लादयन्कुम्भ्यामवदध्यात्स्त्री

---

१ °दधाति B. २ इति only in B. ३ अन्यं only in B. ४ आदाय the MSS; उपोष्य M¹, प्रोह्य B. ५ Thus (rightly!) the MSS. ६ परात् M¹; B om. ७ After वा both MSS. insert इति. ८ स्वकृतं not in B. ९ B omits the first demonstr. pronoun; °जातामसो M¹. १० MSS. corrupt; M¹: चेन्दुकुल्यं; B: दुनग्रथ्य (here only the syllable चे seems to fail). ११ Thus B (and the comm.); शोकाहे M¹. १२ Not in M¹.

चेद्बट एव[1] दध्याच्चतुष्पथमतीत्य महावृक्षं नदीं वा तीर्थेषु निखनेत् प्रेतस्य तृतीयायां स्नापयन्त्यपामार्गेण मृदा गोमयेन च[2] वासांसि प्रक्षाल्य दशरात्रमासते[3] चतुर्थ्यां भिक्षामावर्तयेरन्तस्य सिद्धमग्नौकरणं[4] कालं च यावदाकांक्षेयुर्भिक्षयानुसंतरेयुरूर्ध्वं[5] दशरात्राच्छ्राद्धं दद्युर्न दद्युरा श्राद्धस्य प्रदानान्नक्षत्रेषु[6] नियमो मघास्वेकतारेषु भरणीषु च पूर्वममयेषु[7] न रोहिण्यामुत्तरेषु ध्रुवेषु ब्राह्मणान्हविरर्हानुपवेश्य तांस्तर्पयित्वैकवत्पिण्डं दद्यान्न चान्विति[8] ब्रूयात्सर्वैः कामैस्तर्पयेदनुगमनं कृत्वा शेषमनुज्ञाप्य प्रत्येत्य शेषं[9] न प्राश्नीयाद्ब्राह्मणान्स्वस्ति वाच्य प्राश्नीयात् ॥५॥

अथातो गृहकर्मणो गृहवृद्धिमिच्छन्मासिमास्यृतावृतौ संवत्सरे-संवत्सरे वा[10] पूर्वपक्षे पुण्ये नक्षत्रे गृहशान्तिमारभेतापामार्गपलाशशिरीषार्कौदुम्बरसदाभद्रामृततृणमिन्द्रवल्लीभिर्बद्ध्वा गृहान्परिमार्ज्य परिसमूह्यापो ऽभ्युक्ष्य पञ्चगव्यैर्दर्भमुष्टिना संप्रोक्ष्य सिद्धार्थकान्संप्रकीर्य[11] वास्तुबलिं कृत्वा वास्तोर्मध्ये वास्तोष्पतिं हुत्वा सावित्र्या सहस्रं जुहुयात्ततो दक्षिणपुरस्तात्ततो दक्षिणपश्चात्तत उत्तरपुरस्तात्तत उत्तरपश्चान्मध्ये वा गौर्वासो हिरण्यं दक्षिणा ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वैवं प्रयुञ्जानो ऽनन्तं महान्तं पोषं पुष्यति बहवः पुत्रा भवन्ति न च बालाः प्रमीयन्ते नाग्निर्दहति न दंष्ट्रिणः खादयेयुर्न तस्कराः सपत्ना रक्षांसि पिशाचा अपि

१ Not in $M^1$. २ चा $M^1$; missing in B; the comm., however has च. ३ Thus B: दशरात्रशेषं $M^1$. ४ Not in B: the comm., however, seems to indicate, that these words, which run thus in M: तस्यासिद्धंकर्म्नौकरणं, belong to the text. ५ अनु not in B; $M^1$ has: कालश्छकांक्षेयुः भिक्षयानुसंतनीयुः ६ Before नक्षत्रेषु $M^1$ has the following, to me unintelligible words: पशुछेदेकपम्यत्रो ७ $M^1$ ins. वा ८ च not in B. ९ om. B: शेष्य $M^1$. १० Not in $M^1$. ११ °सं° only in $M^1$.

बाधन्ते यदि गावः प्रतप्येरन्गवां मध्य आहुतिसहस्रं जुहुयादित्येतेनैव कल्पेनाश्वोष्ट्रखराजाविकमहिषहस्तिकुलमन्यतरद्द्विपदां चतुष्पदां च[1] व्याख्यातम् ॥६॥

अथातोऽद्भुतशान्तिं व्याख्यास्यामोऽथ यद्यगारे स्थूणा विरोहेत्[2] कपोतो वागारं गच्छेद्गौर्वा गां धयेदनड्वान्वा[3] दिवमुल्लिखेदनग्नौ[4] वा धूमो जायेतानग्नौ वा दीप्येत मधु[5] वा[5] जायेत वल्मीकं वोपजायेत मण्डूको वाम्भृणे[6] वाश्येच्छ्वानो[6] वा गृहे पर्यटेयुरित्येतानन्यांश्च यत इन्द्र भयामहे । सदसस्पतिमद्भुतम् । अधायामुतेसुमुदस्य[7] । सनादग्ने । यद्वा उ विश्पतिः शितः । प्रत्यग्ने । यं रक्षन्ति । प्राजापत्ययर्चा[8] पुरस्ताच्चोपरिष्टाच्च[9] महाव्याहृतिभिर्जुहोति[10] एतान्यृक्सामानि गायेत् ॥७॥

अथातोऽनश्नत्संहितायाः कल्पं व्याख्यास्यामः शुचिवासाः स्याच्चीरवासा वा हविष्यमन्नमशनमिच्छेदपः फलानि वा ब्राह्मणस्त्वेव[11] प्रत्याहरेत्प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य शुचौ देश उदकान्ते वा गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य प्रोक्ष्य लक्षणमुल्लिख्याद्भिरभ्युक्ष्याग्निमुपसमाधायाघारावाज्यभागौ हुत्वाज्याहुतीर्जुहोत्यग्नये सोमाय रुद्रायेन्द्राय ब्रह्मणे प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्य ऋषिभ्य ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै प्रज्ञायै मेधायै सावित्र्यै सदसस्पतयेऽनुमतये च हुत्वा दर्भेष्वासीनः प्राक्तूलेषूदक्तूलेषु वा दक्षिणेन पाणिना दर्भान्धारयन्नोंपूर्वा व्याहृतीः सावित्रीं च चतुरनुद्रुत्य मनसा सामसावित्रीं च सोमं राजानं ब्रह्मजज्ञानीये चोभे

---

१ Not in B. २ वरोहेत. ३ गन्धयेयु अनडवा ४ °खत् अग्नौ ५ मधुना ६ वाभ्रमणांवाशपेच्छ्वानो ७ Citation corrupt. ८ प्राजापत्यायाच ९ °पुरस्तान वोपरि° १० °व्याहृर्ताजु° ११ °स्त्वेवा B; °स्त्वेवं M²; °स्त्वैवं M¹.

वेदादिमारभेत संततमधीयीत मौनी न चान्तरा विरमेत्[1] अथान्तरा व्याहरेदथान्तरा विरमेत्[2] त्रीन्प्राणानायम्यातम्याचम्य[3] वृतान्तादेवारभेताप्रतिभायां यावता कालेन वेदमधीयति तावत्कालमधीयीत यज्ञानीयादृक्को यजुष्टः सामतस्तदवाप्नुयात्तद्ब्राह्मणं तच्छान्दसं तद्दैवतं साम वा अक्कानित्येनदेव धाभ्यस्येत्तिष्ठन्नासीनः शयानश्चङ्क्रम्यमाणो[4] वा संहितां प्रयुञ्ज्यात्समृद्धिरेवास्य भवत्याद्यं त्रिवर्गं वा सहस्रकृत्व इति जैमिनिश्च वार्यमन्तं[5] वा यथाकामी वा द्वादश संहिता अधीत्य यदनेनानध्यायेष्वधीतं यद्गुरवः कोपिता यान्यकार्याणि कृतानि ताभिः पवते शुद्धमस्य पूतं ब्रह्म भवत्यथापरा द्वादश संहिता अधीत्य ताभिः प्रजापतेर्लोकमवाप्नोत्यथापरा द्वादश संहिता अधीत्य ताभिरुशनसो लोकमवाप्नोत्यनश्नत्संहितासहस्रमधीत्य ब्रह्मभूतो विरजो भवति कामचारी सर्वान्कामानवाप्नोति संवत्सरं भैक्षभक्षः प्रयुञ्जानश्चक्षुर्लभते षण्मासान्यावकभक्षश्चतुरो मासानुदकसक्तुभक्षो द्वौ मासौ फलभक्षो मासमब्भक्षो द्वादशरात्रं वानश्नन्[6] क्षिप्रमन्तर्धीयते ज्ञातीन्पुनाति सप्तातीतान्सप्तानागतानात्मानं च पञ्चदशं तारयते तामेतां देवनिश्रेणीत्याचक्षत एतया वै देवा देवत्वमगच्छन्नृषय ऋषित्वं तस्य ह वा एतस्य ब्रह्मसत्त्रस्य त्रिविध एवारम्भो भवति प्रातःसवने माध्यंदिने सवने ब्राह्मे वापररात्रे तस्य ह वा एतस्य द्वावेवानध्यायौ यदात्माशुचिर्यद्देशस्तद्वा एतत्प्रजापतिः सप्तऋषिभ्यः प्रोवाच सप्तऋषयो महाजह्नवे महाजह्नुर्ब्राह्मणेभ्यो ब्राह्मणेभ्यः ॥ ८ ॥

१ Thus B M²; व्याहरेत् M¹. २ Thus M²; B om. अन्तरा before विरमेत्; M¹ om. अथान्तरा व्याहरेत्. ३ आतम्य only in B, instead of it M²: आचम्य; M¹ om. ४ शयानः only in M¹; °चक्रम्य° both MSS. ५ Thus emended; °चावार्यन्नं B; चवाप्यन्तं M¹. ६ वानश्नान् B; वाप्राश्नात् M¹.

अथ ग्रहाणामातिथ्यं बलिकर्मोपरुतं[1] व्याख्यास्यामः अश्रद्धानमशुचिकरणमजाप्यं[2] त्यक्तमङ्गलं । सुव्यक्तं ग्रहा नयन्ति[3] पुरुषं यमसादनम्[4] । ग्रहाणां दीप्रचेष्टानां नक्षत्रपथचारिणाम् । ग्रहातिथ्यं[5] प्रवक्ष्यामि शान्तिकर्मणि कारयेत् । भास्कराङ्गारकौ[6] रक्तौ श्वेतौ शुक्रनिशाकरौ । सोमपुत्रो[7] गुरुश्चैव तावुभौ पीतकौ स्मृतौ । कृष्णं शनैश्चरं विद्याद्राहुं केतुं तथैव च । ग्रहवर्णानि पुष्पाणि प्राज्ञस्तत्रोपकल्पयेत् । गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य प्रोक्ष्य लक्षणमुल्लिख्याद्भिरभ्युक्ष्याग्निमुपसमाधायाघारावाज्यभागौ हुत्वा ग्रहानावाहयन्त्यादित्यं मध्ये लोहितं[8] पूर्वदक्षिणतः सोमम् । पूर्वोत्तरतो बुधमुत्तरेण[9] गुरुं पूर्वेण भार्गवम् । पश्चिमे शनैश्चरं विद्याद्राहुं दक्षिणपश्चिमे[10] पश्चिमोत्तरतः केतुं[11] वृत्तमादित्याय त्रिकोणमङ्गारकस्य चतुरश्रं[12] सोमाय बाणं बुधाय दीर्घचतुरश्रं बृहस्पतये पञ्चकोणं शुक्राय धनुः शनैश्चराय राहोः शूर्पं केतोर्ध्वजमिति[13] ईश्वरं भास्करं विद्यात[14] उमां सोमं तथैव च । स्कन्दमङ्गारकं चैव बुधो[15] नारायणः स्थितः । बृहस्पतिः[16] स्वयं ब्रह्म शुक्रः शक्रस्तथैव[17] च । यमं शनैश्चरं विद्याद्राहोः कालदूतिनः[18] केतोश्चित्रगुप्तश्चेत्येते ग्रहदेवताः अग्निरापो भूमिर्विष्णुरिन्द्राणी प्रजापतिः सर्पो ब्रह्मेत्येते प्रत्यधिदेवताः जातमर्क[19] कलिङ्गेषु यामुनेषु च चन्द्रमाः । विन्ध्य अङ्गारकदेशो[20] मध्यदेशो[21] बुधः स्मृतः । बृहस्पतिः सिन्धुदेशः शक्रदेशो[22] घटेषु च । शनैश्चरस्तु सौराष्ट्रो राहुस्तु पूर्वदे-

१ Sic ! are we to read: °कर्मोपहूतं ? २ Sic ! °करण° must probably be cancelled. ३ नावाहयन्ति ४ °दने ५ ग्रहातीर्घं ६ °ङ्कारकौ ७ सोपुत्रो ८ After लोहितं the word दक्षिणतः is inserted. ९ नुधंउत्त° १० दक्षिणतः प° ११ केतु १२ °श्रां १३ ध्वजप्रमिति १४ चैव instead of विद्यात् १५ बुधं १६ °पातिं १७ शुक्रं शक्रं १८ Sic ! १९ Sic ! जातो ऽर्कः to be restored ? २० विन्ध्यामङ्गारको देशो २१ मघादेशो २२ शक्रोदेशो

# EXTRACTS

FROM THE

# COMMENTARY.

शिकः केतुः पर्वत इत्येते देशानां ग्रहजात[1] इति अर्कसमिधमादित्याय प्रादेशमात्राभिघारितानाम्यादिभिर्जुहुयात्[2] खादिरमङ्गारकाय पालाशं सोमायापामार्गं बुधायाश्वत्थं बृहस्पतय औदुम्बरं शुक्राय शमीं शनैश्चराय राहोर्दूर्वाः केतोः कुशाग्रमित्यष्टाविंशतिमाज्याहुतीर्जुहोत्येताभिः पक्वाग्नेर्जुहोत्यादित्याय इलोदनं[3] हविष्यमन्नमङ्गारकाय[4] सोमाय घृतपायसं पयोदनं बृहस्पतये चीरोदनं[5] शुक्राय दध्योदनं बुधाय[6] तिलपिष्टमाषोदनं शनैश्चराय राहोर्मांसोदनं केतोश्चित्रोदनमिति आ सत्येनेत्यादित्याय[7] अग्निर्मूर्धा दिव इत्यङ्गारकाय आप्यायस्व समेतु इति सोमाय ब्रह्म जज्ञानमिति बुधाय बृहस्पते अति यदर्य इति बृहस्पतये अस्य प्रत्नामनु द्युतमिति शुक्राय शं नो देवीरभिष्टय इति शनैश्चराय कया नश्चित्र आभुवदिति राहोः केतुं कृण्वन्नकेतव इति केतोः रक्तां[8] धेनुमादित्याय रक्तमनड्वाहमङ्गारकाय सोमाय शङ्खं बुधाय काञ्चनं बृहस्पतये वासः शुक्राय हयं नीलां गां शनैश्चराय राहोः कृष्णायसं केतोः कुञ्जरमिति सर्वेषामपि हिरण्यं वा येन वा तुष्यत्याचार्यस्तद्दाति यथा समुत्थितं यन्त्रं[9] यन्त्रेण प्रतिहन्यते । तथा ग्रहोपसृष्टानां शान्तिर्भवति दारुणम्[10] ॥ नादिशेत्तपसा युक्तं नादिशेद्दिवमाश्रितम् । न च वेदान्तकं विप्रं वृत्तान्तां नारीं परिवृताम्[11] ॥ अहिंसकस्य दान्तस्य धर्मजितधनस्य च । नित्यं च नियमस्थस्य[12] सदानुग्रहा ग्रहाः ॥ ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः ॥९॥

॥ इति जैमिनिसूत्रं समाप्तम् ॥

---

१ Sic ! must we restore इत्येतेषु देशेषु ग्रहा जाता इति   २ Sic !
३ Sic !   ४ हविष्य°   ५ वीतोदनं   ६ This word added by me.
७ सासत्यनेत्य°   ८ रक्तु   ९ °त्थितय°; यन्त्रं must be corrupt ; Baudh. has घोरं   १० Sic !   ११ A corrupt Sloka !   १२ तिष्ठनीयमस्थस्य

# श्रीनिवासाध्वरिविरचिता जैमिनिसूत्रव्याख्या सुबोधिनी ॥

जैमिनिसूत्रं पूर्वम् ।

प्रथमः खण्डः ॥

पादैर्हस्तैः शिरोभिश्च भूर्भुवःस्वरधिष्ठितम् ।
ज्योतिष्पूरं दुरालोकं ज्वलज्जाम्बूनदप्रभम् ॥
संप्रवृत्तिनिवृत्तिभ्यां संविदः सलिलस्य च ।
विराजमानं विश्वेषां हृदि सूर्ये च संततम् ॥
अनाद्यन्तमनीशं तमन्तराध्याद्यपूरुषम् ।
प्राक्तारिकांश्च वृत्तीश्च मन्वादेर्वचनान्यपि ॥
न्यायांश्च शिष्टाचारांश्च समालोच्य पुनः पुनः ।
संचिताखिलसारापि स्वल्पग्रन्था सुबोधिनी ॥
व्याख्यया व्यक्तयोपेता मन्त्राणां च यथामति ।
टीका जैमिनिसूत्रस्य श्रीनिवासेन तन्यते ॥
नात्र प्रमाणेन विना कश्चिदप्यर्थ उच्यते ।
नानूद्यते प्रमाणं तु ग्रन्थविस्तरशङ्कया ॥

ad p. 1, l. 1—2. अथेति मङ्गलार्थमत इत्यारम्भार्थम् । अग्निं प्रणेष्यन्प्रदेशान्तरे स्थापयितुमिच्छन्विहितकर्मण इति शेषः । प्रागुत्तरप्रदेशावनतं स्थण्डिलं कृत्वाभ्युक्ष्य तस्य मध्ये वक्ष्यमाणपञ्चरेखात्मकलक्षणं दर्भादिना लिखेत् । गोमयेनोपलिप्य त्रिरुद्धृत्यावोक्षितायां भुवि पञ्चप्रस्थमिताभिः सिकताभिर्मृद्भिर्वा कृतमरत्निचतुरश्रं धिष्ण्यं स्थण्डिलमिति पूर्वाचार्यसंज्ञा ॥

ad p. 1, l. 2—3. स्थण्डिलमध्यात्प्राङ्मुखीं रेखामुल्लिख्य तस्याः पश्चात्तया संहितां संयुक्तामुदङ्मुखीमरत्न्यायतां रेखामुल्लिख्य तस्याः पश्चात्तस्या मध्ये समासये तिस्रः प्राङ्मुख्यो रेखाः प्रादेशायामा उल्लिखेरन् । तथा च प्रत्यङ्मुखशूलाकृतिलक्षणं भवति ॥

ad p. 1, l. 4. यस्मिन्होममात्रं प्रधानं स हुतः औपासनादिः । यस्मिन्न विद्यते होमः स अहुतः सन्ध्यावन्दनादिः । यस्मिन्होमो ऽन्यच्च प्रधानं स प्रहुतः पुंसुवनादिः । पुंसुवने हि पुरुषसूक्तहोमः पुल्लिङ्गप्रश्नश्च प्रधानं । प्राशितं श्राद्धकर्म । एवं चतुर्धा पाकयज्ञान्व्याख्यास्यामः । यस्मादेते दर्शपूर्णमासादिभ्यो ऽल्पे भवन्ति तस्मादेषु पाकयज्ञाख्या । पाकशब्दो ह्यत्राल्पार्थकः ॥

ad p. 1, l. 5. तेषां पाकयज्ञानां होम एकाग्नौ कर्तव्यः। न तु कर्मणिकर्मणि पृथगग्निरुपादेयः। सर्वकर्मार्थमेको ऽग्निर्धार्यः। स चार्थादौपासनाग्निरिति प्रसिद्धं। ब्रह्मचर्याद्यर्थसमिदाधानादिस्तु तेषामौपासनाग्न्यसंभवाल्लौकिके इति सिद्धम्॥

ad p. 1, l. 5. एते कर्मादौ स्तः विकल्पानुक्तेरेव नित्यत्वे सिद्धे नित्यशब्दग्रहणं स्त्रिया अपि यज्ञोपवीताकारेण उत्तरीयं कर्माङ्गं भवति। श्रोतस्पर्शाद्यनुकल्पव्यावृत्त्यर्थमुदकग्रहणम्॥

ad p. 1, l. 5. एते पाकयज्ञा दर्शपूर्णमासतन्त्रसदृशतन्त्रा भवन्ति। एतेन यदेतेष्वनुक्तमाकांक्षितं तद्दर्शपूर्णमासाभ्यामानेतव्यं। यथा खादिरः पालाशो वेध्म इत्युक्ते एकविंशतिरिध्मदारूणीति॥

ad p. 1, l. 6. वाशब्दश्चार्थः। एते स्वतन्त्राश्च भवन्ति न सर्वत्रैषां दर्शपूर्णमासतन्त्रमानेतव्यमित्यर्थः। तेनात्र न ऋत्विग्वरणादि। तथा च सूत्रद्वयार्थे आचाराद्यवस्थापनीयः॥

ad p. 1, l. 6. पूर्णपात्रस्य दक्षिणात्वं वक्ष्यति (p. 6, l. 1)। तयोग्यथाशक्ति व्रीह्यादिपूर्णं पात्रमित्यर्थः॥

ad p. 1, l. 6. पूर्णपात्रस्य पुरस्तात्खादिरादिमयं जलपूर्णं स्रुवं चोपनिदधाति॥

ad p. 1, l. 7. इध्मश्च बर्हिश्चेध्माबर्हिः। उपलक्षणमेतत्। अनिर्दिष्टस्थानं सर्वमुत्तरत उपनिदधाति। प्रोक्षणीनामग्नेः पश्चादुपनिधानमाचारात्॥

ad p. 1, l. 12—13. शुक्लानां सुमनसामलाभे जपापुष्पादीनि पश्च वर्जयित्वा। गन्धवत्यश्चेत्सर्ववर्णाः कृष्णरक्तादिवर्णाः सुमनसो ग्राह्याः। वाशब्दश्चार्थः॥

ad p. 1, l. 13—14. ऊधन्यं नवनीतं वा। वाह्यं वा घनीभूतं। दधि वा पयो वा। एताश्चतस्र आज्यप्रकृतय आज्यहेतव आज्यकार्ये भवन्ति यद्याज्यं न लभ्यते॥

ad p. 1, l. 14. प्राग्विहितस्याचमनस्य प्रदेशनियमो ऽयम्॥

ad p. 1, l. 14—15. प्रसङ्गात्सार्वत्रिकस्याचमनस्यायमनुष्ठानक्रम उच्यते॥

ad p. 1, l. 15. शीर्षण्यान्प्राणान् चक्षुषी नासिके श्रोत्रे चेत्यर्थः॥

ad p. 2, l. 3. रात्रिश्चेन्मन्त्रजपकालः धनमिति पदमपोह्य तत्स्थाने वास्विति ब्रूयात्॥

ad p. 2, l. 4. परिसमूहनं नाम आर्द्रेण पाणिना अग्निं परितः संमार्जनं तच्च प्रत्यृचमन्ते सकृत्सकृद्भवति॥

ad p. 2, l. 4—5. प्रस्तरमुपसंगृह्य सप्रस्तरेण पाणिना प्रतिदिशं प्राङ्दक्षिणादिक्रमेण दक्षिणपुरस्तादुपक्रम्य प्राचीनानां मूलानि दक्षिणोत्तराग्रैस्तन्मूलानि च प्रतीचीनाग्रैश्छादयन्सर्वत्र प्रागग्रैर्दर्भैः पूर्वपश्चिमयोः प्रादेशमात्रैरितरेतरयोररत्निमात्रैः परिस्तृणाति ॥

ad p. 2, l. 5. पश्चिमतो वा प्रथमं परिस्तीर्यानन्तरं द्वाभ्यामुलपराजिभ्यां दर्भमुष्टिभ्यामरत्निमात्राभ्यां पश्चिमपरिस्तरणदक्षिणोत्तरयोः संसक्तमूलाभ्यां पूर्वस्यां मध्ये संहिताग्राभ्यामुपहरेत्परिस्तृणीयात् ॥

ad p. 2, l. 6. पूर्वस्यामुक्तः परिस्तरणसन्धिस्तु दक्षिणोत्तरो भवति। दक्षिणपरिस्तरणमुत्तरमुपरिगतं यस्मिन्तादृशो भवतीत्यर्थः। पक्षद्वये प्रथमश्चतुरश्रः द्वितीयस्त्रिकोण इति वेदितव्यम् ॥

द्वितीयः खण्डः ॥

ad p. 2, l. 7. पूर्वगृहीतात्प्रस्तरात्पवित्रसंज्ञे भाविनी तृणे अप्रशीर्णाग्रे अच्छिन्नाग्रे अनन्तर्गर्भे अन्तस्तृणान्तररहिते प्रादेशमात्रे ते गृह्णाति ॥

ad p. 2, l. 10—14. ते पवित्रे कस्यचित्पात्रस्योपरिष्टाद्वामकरेण धारयन्तस्मिन्पात्रे पवित्रे प्लावयन्नाज्यमासिच्य अग्नेरुत्तरतः परिस्तरणस्यान्तरेव कतिचिदङ्गारान्पृथक्कृत्य तेषु तदाज्यमारोप्य दर्भज्वालया प्रदीप्य दर्भाग्राभ्यां क्षिप्त्वा त्रिर्दर्भज्वालया प्रदक्षिणीकृत्य परिस्तरणादुत्तरत आज्यमवरोप्याङ्गारानग्नौ संयोज्य उदगग्राभ्यां पवित्राभ्यामाज्यं च हविश्च प्रणीताश्च स्रुवं चानेन यजुषा त्रिरुत्पुनाति प्रागपवर्गं मन्त्रोक्तिः सकृत्सकृदिति वक्ष्यति (p. 2. l. 15)। देवः सविता त्वा त्वां। उत्पवनीयं वस्तु पुनातु पवित्रीकरोतु। अच्छिद्रेण पवित्रेणादित्येनासौ वा आदित्यो ऽच्छिद्रं पवित्रमिति ब्राह्मणं। वसोस्तेजस्विनः सूर्यस्य रश्मिभिश्चोत्पुनात्विति मन्त्रार्थः ॥

ad p. 2, l. 15. आज्यस्य विहितमुत्पवनं। पश्चिमतः पवित्रे पुनराहृत्य आहृत्य कर्तव्यं। तथा च पवित्रे प्रागानीय पश्चान्नीत्वा प्रागानेतव्ये इति सिद्धम् ॥

ad p. 2, l. 15—p. 3, l. 8. प्रणीतार्थमुत्पूता अपः परिस्तरणाद्बहिरुत्तरतो ऽग्नेः प्रतिष्ठाप्य दर्भैः प्रच्छाद्य तथा दक्षिणतो ऽग्नेः पूर्णपात्रस्रुवयोरुत्तरतः प्रस्तरं निधाय तदुपरिष्टात्पवित्रे निधाय विरूपाक्षदैवतमिमं मन्त्रं जपति। परिस्तरणादौ प्रस्तरोपसंग्रहणस्य प्रणीताप्रणयनानन्तरं प्रस्तरनिधानस्य च विधानात्तदन्तर्विहितानि कर्माणि प्रस्तरपाणिना कर्तव्यानीति गम्यते। तप इत्यादि दश पदार्थाधिदैवतानि विरूपाक्षविभूतिभूतानि पूर्वे प्रपद्ये। तानि मामवन्तु महादेवभजनशक्तं कुर्वन्तु। अनन्तरं भूर्भुवःस्वः त्रैलोक्यात्मतया वर्तमानमोमिति प्रणवान्तवेद्यशुद्धचैतन्यरूपं। महान्तमपरि-

च्छिन्नमात्मानं परमात्मानं त्वामध्यारोहामि शरणीकरोमि। त्वं भक्तेषु प्रकटितरौद्रवेषतया विरूपाक्षो ऽसि भयंकरनेत्रो ऽसि। दन्ताभ्यां दंष्ट्राभ्यामनाक्ति व्यक्तीभवति प्रकाशते इति दन्ताञ्जिरसि। तादृशस्य ते शय्या निवासः पर्णे पर्णपटलाच्छन्नतया दुर्गमेकान्तरे भवति। नमः पर्याय च पर्णशद्याय चेति श्रूयते (cp. T. S. IV. 5. 9. m)। परमार्थस्वरूपस्य ते तव तु गृहा गृहं निवासस्थानमन्तरिक्षे विशुद्धहृदयदहराकाशे तच्च विमितं विगतमानमपरिच्छिन्नं। हिरण्मयं हितं च रमणीयं चादित्यवर्णमिति वा। यस्मादेवं तस्माद्देवानां सर्वेषां तानि हृदयानि सारांशा अयस्मये कुम्भे इवाच्छिद्रुरस्वभावे त्वयि अन्तः तदन्तर्भागे संनिहितानि संगृहीतानि। नमो वः किरिकेभ्यो देवानां हृदयेभ्य इति श्रूयते (cp. T. S. l. c. p)। सर्वदेवतात्मासीति यावत्। बलभूर्बलाकरश्च त्वं बलधा च भजतां बलपोषकश्च। रक्ष णो अस्मान् णत्वमार्षं। मा प्रमदः प्रमादादन्तरा मा त्याक्षीः। सत्यं खलु ते तव स्वरूपमेव कथमन्तरात्यागो भवेदिति भावः। द्वादश ते तव कालरूपस्य पुत्राश्चैत्रादिमासरूपा यदङ्गेषु वसन्तादिषु सर्वो ऽपि यज्ञस्त्वां संवत्सरे संवत्सरे कामं प्राति पूरयतीति कामप्रः कामपूरकः। तादृशेन दर्शपूर्णमासादिना यज्ञेन सर्वेण याजयित्वा पुनःपुनर्ब्रह्मचर्यं दीक्षां यष्टुमेवोपयन्ति पुनः पुनः परिवर्तमानैश्चैत्रादिभिर्यजनादेवमुच्यते त्वमेव खलु सर्वकामात्मा सर्वयज्ञानामाधारभूतो यजनीयश्चेति यावत्। लौकिकदृष्ट्या साजात्येनापि विशेषरक्षणीयतामाह। त्वं देवानामित्यादि। उपधावति शरणीकरोति। जपन्तमित्यादि कृतस्य प्रतिकरणं प्रतिहननं तन्मा कार्षीरिति भावः। त्वामित्यादि प्रसूतो ऽनुज्ञातः। शिष्टं स्पष्टम्॥

तृतीयः खण्डः॥

ad p. 3, l. 9—11. स्रुवगता अपः प्रणीतास्वासिच्य। स्रुवं निष्टप्य दर्भैः संमृज्य संमार्गान्संमार्जनसाधनभूतान्दर्भानभ्युक्ष्याग्नौ क्षिप्त्वा जानु दक्षिणमाच्य अवनम्य। घृतं निरीक्ष्य। तस्मिन्नाज्ये घुणश्री अम्बुका (sic) पिपीलिका इत्यादिजन्तुजातममेध्यं पवित्रं किंचिद्वा पश्चभ्यः पश्चानधिकमवपद्येत संभाव्येत चेत्तदुद्धृत्य देवस्य त्वेत्यभ्युक्ष्यैताभ्यामेव पवित्राभ्यां प्राग्वदुत्पूय होतव्यं जुहुयात्। अधिकाशुद्धावन्यदाज्यमुपादाय यथाविधि संस्कार्यमिति भावः॥

ad p. 3, l. 11—13. स्थवीयसं स्थवीयांसं स्थूलतमं मध्यममायामेन न्यूनमग्नेः पश्चाद्भागे। दीर्घं मध्यमं स्थौल्येन न्यूनमग्नेर्दक्षिणतः। कनीयसं कनीयांसमायामेन स्थौल्येन कनीयांसमग्नेरुत्तरतः। एवं त्रीन्परिधीन्परस्परसंस्पृष्टान्परिदधाति। विहितशुक्लसुमनोभिरन्यायतनमलंकुर्यात्॥

ad p. 3, l. 13. कोशं धारां निनयति सिञ्चति॥

ad p. 3, l. 18—20. हे जातवेदः अयमिध्मः ते आत्मा शरीरं। तेन इध्मेन वर्धस्व च इध्यस्व च दीप्यस्व चास्मानिन्द्धि दीपय वर्धय च प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय संपन्नान्कुरुष्व च ॥

ad p. 3, l. 20—22. अग्नावेव। उत्तरं परिधिसन्धिमनुगताद्देशात् वायुकोणादारभ्येत्यर्थः। अदणया विदिङ्मुखतया यावदाग्नेयकोणमित्यर्थः। सततं निरन्तरमाज्यमासिञ्चन्प्रजापतये स्वाहेति मनसोच्चरन्स्रुवमवहृत्य नीत्वा। अथ दक्षिणं परिधिसन्धिमनुगताद्देशादिन्द्राय स्वाहेति मनसा मन्त्रमुच्चरन्प्राग्वद्यावदीशानकोणं स्रुवं नीत्वा। एवमाघारौ नाम द्वे आहुती जुहोति ॥

ad p. 4, l. 1—3. तावाज्यभागदेशावन्तरेण तयोर्मध्य इत्यर्थः। आहुतीनामासां चतसृणां वक्ष्यमाणानां च लोकः स्थानं भवतीति। एतावदग्निमुखं नाम सर्वाग्निकर्मणां पूर्वाङ्गम् ॥

ad p. 4, l. 4—5. इदमादीनि परिभाषासूत्राणया खण्डसमाप्तेः। स्विष्टकृत्संबन्धिनः स्थानात्प्रत्यगाहुत्या आहुतिमनभिजुह्वदसंयोजयन्। हुतस्यहुतस्य उत्तरपूर्वामुत्तरपूर्वामाहुतिं जुहोति ॥

ad p. 4, l. 5—6. लाजान्वपतीति विधानात् वपनरूपहोमो लाजहोमः। लाजहोमाज्यहोमाभ्यामन्यत्र सर्वाहुतीनामन्ते सर्वाहुतीनामुत्तरपूर्वभागे स्विष्टकृदग्निर्नित्यः। अग्नये स्विष्टकृते स्वाहेति तदीयाहुतिर्नित्या सार्वत्रिकेत्यर्थः ॥

ad p. 4, l. 6—7. अवदानानन्तरं स्थालीस्थे हविषि यत्प्रत्यभिघारणं विधास्यते तत्स्विष्टकृतमवदाय न कुर्यात् शेषस्य स्विष्टकृत्प्रकारस्यानभिधानात्। उपस्तीर्य सकृदवदाय द्विरभिघारणमिति दर्शपूर्णमासत आनीयते द्विरवदानमपि पञ्चावत्तिनामिति च ॥

ad p. 4, l. 7—8. प्रत्यभिघारयति स्थालीस्थं हविरिति शेषः। अङ्गुष्ठेन संनिधानात्तर्जनीमध्यमाभ्यां चाङ्गुलिभ्याम् ॥

ad p. 4, l. 9—10. जामदग्न्यानां भार्गवाणां। तद्धि पञ्चावत्तं भवतीति पूर्वाचार्यमतानुवादः। प्रत्यभिघारणं विना स्रुवोपस्तरणेन सह पञ्च संख्या ॥

ad p. 4, l. 10. विहितमुपस्तरणमभिघारणं चाङ्गुल्या तर्जन्या दर्भकूर्चेन वा कर्तव्यमित्यर्थः ॥

चतुर्थः खण्डः ॥

ad p. 4, l. 13. निरस्यति निष्कर्षति ॥

ad p. 4, l. 14—15. अनुप्रहरति जुहोति। द्विषन्तं मे अभिधेहि जानीहि तं प्रतिदह चेति ॥

ad p. 5, l. 5—7. दर्भान्परिस्तरणानि । सदसि शुभकरमसीति । प्रणीताचमसं प्रति ॥

ad p. 6, l. 8—12. ऋत्विजो देवाः पृथिव्यादयः पृथिवी होतेत्येवमादि श्रूयते । मासास्तद्देवता । गृहा गेहाधिष्ठात्र्यः ॥

ad p. 6, l. 1—2. यथाश्रद्धदक्षिणा येषां ते यथाश्रद्धदक्षिणा इमे सर्वे पाकयज्ञा भवन्ति । विहितहिरण्यादौ ब्राह्मणविहितेतरदानं च यथाश्रद्धं भवेदित्यर्थः ॥

ad p. 6, l. 2. विहितहिरण्यादिदानाशक्तौ सर्वपाकयज्ञेषु पूर्णपात्रमात्रं वा दक्षिणा भवति । दक्षिणा चाध्यापकाय तदभावे श्रोत्रियायेति वक्ष्यति । आवृत्तिः प्रश्नसमाप्तिद्योतनार्थः ॥

पञ्चमः खण्डः ॥

ad p. 6, l. 3. गृष्टेः प्रथमगर्भाया नार्याः पुंसुवनं । अन्यत्र चतुर्थे मासि स्यात् ॥

ad p. 6, l. 3—4. पृषदाज्यं दधियुक्तमाज्यं । स्थालीपाकवत्संस्कृत्य हविरिवोत्पूयेत्यर्थः । प्रसङ्गादस्माकं पुरुषसूक्तं सप्तर्चमत्र व्याख्यायते ॥

ad p. 6, l. 4—6. माषौ च वृषणवत् यवं च शिश्नवत् संनिवेश्य रेतोबिन्दुवदग्रेण दधिबिन्दुना सहानेन मन्त्रेण प्राशयेत् ॥

ad p. 6, l. 7—8. फलाभ्यामुपहितं मूलतः संसक्तं न्यग्रोधशुङ्गं वटसमिदग्रं । तथा च वृषणोपहितशिश्नसदृशमिति यावत् ॥

ad p. 6, l. 8. एवं कृतमिदं कर्म निश्चयेन कुमारोत्पत्तये स्यादिति पूर्वाचार्या आचक्षते ॥

षष्ठः खण्डः ॥

ad p. 6, l. 10—11. श्व इत्यादि नान्दीमुखदिनात्पूर्वेद्युर्वा । नान्दीमुखदिने एवान्नं संस्कृत्य तदनन्तरं वा इत्यर्थः ॥

ad p. 6, l. 12—15. दध्यादिभिश्चतुर्भिः शुक्लद्रव्यैरष्टाभ्यो देवताभ्यः प्रतिद्रव्यमेकैका पंक्तिरिति चतुर्धा हरति । नमःशब्दस्य पृथक्पृथग्योगः । अग्न्यायतने यत्राग्निः प्रणेष्यते तत्रेत्यर्थः ॥

ad p. 6, l. 16. माषाशनेन मत्स्याशनेन मांसाशनेन भक्ष्याशनेन वा मिश्रयेदित्यपरं मतमित्यर्थः ॥

सप्तमः खण्डः ॥

ad p. 7, l. 2—3. आ मूर्ध्नः मूर्धपर्यन्तं । प्राणसंमितं नासमभिकृत्य । सीमन्तं केशविभागं प्रत्यङ्मुखस्तिष्ठन्कुर्यात् । मन्त्रे विभजामीति शेषः । प्रतिमन्त्रं सकृत्सकृदिति प्राहुः ॥

ad p. 7, l. 5. परा अन्या भार्येत्यर्थः ॥

अष्टमः खण्डः ॥

ad p. 7, l. 7—10. जातरूपेण समांशसुवर्णेन शिलादौ संघृष्य बालं प्राशयेत्। इदं व्रीहियवमन्नमयं सुवर्णशकलो रसः इदं सुवर्णं प्राणेनास्य प्राणत्वात्तेन सह सहितममृतं पिबेति शेषः। पृथिवीत्यादि द्यौरादित्यस्तदन्तर्वर्ती पुरुषः पिता तद्वीर्यत्वाद्वर्षस्य तस्य धात्री पृथिवी माता। तस्याः खल्वोषधीशरीरेणास्य पूर्वं जननं। ततो ऽन्नरूपेण। ततः शुक्ररूपेण। ततः क्रमाच्छरीरत्वेन। ततो ऽस्य पितुरेव स्तनौ व्रीहियवौ। तौ हैतौ प्रजापतेः स्तनौ यद्व्रीहियवश्चेति श्रुतिः। हिरण्यं च प्राजापत्यो रस इति। शतं शरदः शतं संवत्सरान् जीवाहि जीव। पश्याहि पश्य ॥

ad p. 7, l. 16. वाक्यद्वयमेतत्। पुत्रं प्रत्याह पूर्वं कतमो ऽसि त्वमस्मिन् जन्मनि। सं समस्तगुणैर्मां मां संप्रविशानुकुरु। असावित्यस्य स्थाने आश्विनेत्यादि नाक्षत्रं नामास्य संबुद्ध्या निर्दिशेत् ॥

ad p. 7, l. 18. पशूनां हिंकारः सामात्मकतया शुद्ध इति ॥

ad p. 7, l. 19—p. 8, l. 3. तण्डुलावयवाः फलीकरणाः। लौकिकाग्नावौपासनवद्धोमः। शण्डादयो ऽष्टौ बालघातिग्रहाः। चतुर्थीत्रयं प्रथमार्थे। तथा लिखन्विलिखन्नित्यादि दश। अर्यम्णः शत्रुः कुम्भीत्येकः। निपुणहा अन्त्रीमुख इति पदच्छेदः। एते सर्वे इतःप्रदेशान्नश्यन्त्विति ॥

ad p. 8, l. 3. सूतकौ सूतकवन्तौ ॥

ad p. 8, l. 3--4. उत्थानमशुचित्वान्मोक्षः ॥

नवमः खण्डः ॥

ad p. 8, l. 5. द्वादश्यं जन्मदिनाद्द्वादशे दिवस इत्यर्थः ॥

ad p. 8, l. 8. (अनुनक्षत्रं) यथा कथंचिदस्य जन्मनक्षत्रसंबन्धसहितं वा। यथा सुकृत्तिकः आग्निमित्रः मैत्र इति ॥

ad p. 8, l. 8. (अनुदैवतं) देवतासंबन्धसहितं वा। यथा केशवः शंकर इत्यादि ॥

ad p. 8, l. 8. (अनुनाम) पित्रादेर्नामानुगतं वा। यथा विश्वामित्रः पराशर इत्यादि ॥

ad p. 8, l. 8. (अतद्धितं) सर्वत्र तद्धितान्तवर्जम् ॥

ad p. 8, l. 8. (आकारान्तं स्त्रियै) विहितं नामैव स्त्रियै चेदाकारान्तं कुर्यात् स्त्रीप्रत्ययोपलक्षणमेतत्। यथा जया शंकरीत्यादि ॥

ad p. 8, l. 8--9. (यथार्थं वा) उक्तसर्वविशेषानपेक्षया यथार्थमर्थानुरूपं ज्योतिर्देशाभाविकर्मनिर्णये यो ऽर्थो ऽभिलषितो ऽभिधातुं तदभिधानसमर्थं वा नाम कुर्यात्। यथा सुयज्ञः पुण्यकीर्तिः महामतिरिति ॥

ad p. 8, l. 9. (कुमारयज्ञेषु च) नामकर्मार्थं वक्ष्यमाणदशाहुतयो होतव्या इत्यर्थः ॥

ad p. 8, l. 9. नामाधानानन्तरं कुमारस्य जन्मनक्षत्रं तद्दैवतं जन्मतिथिं च यजते । तेभ्यः स्वनामभिर्जुहुयात् ॥

ad p. 8, l. 10—11. जुष्टाः सेविताः सर्वैरित्यर्थः । अग्निधन्वन्तरिभ्यां स्वाहा प्रजापतये स्वाहेत्यादि सप्ताहुतयः ॥

एकादशः खण्डः ॥

ad p. 8, l. 16. जटा इति शिखाशब्दवाच्याः केशाः ॥

ad p. 9, l. 1. स्फाण्डं (sic) सह कथितम् ॥

ad p. 9, l. 7. दर्भपिञ्जूलीति दर्भद्वयमूलप्रदेशः ॥

ad p. 9, l. 8—9. कात्तान्छित्त्वान् केशान् सदर्भपिञ्जूलीकान्सव्यहस्तेनानेन मन्त्रेण धारयेत् । सुत्रमचै सुखेन वपनं कर्तुमित्यर्थः ॥

ad p. 9, l. 13—14. तथेति चार्थे । एताभ्यां मन्त्राभ्यां क्रमात्पश्चादुत्तरतश्च एवमेव छिन्द्यात् क्षुरादानं विना सर्वमावर्तेतेत्यर्थः । तादिति पूरणः । अयं कुमारस्त्वं येन क्षुरेण कृतवपनः भूयः दीर्घकालं चराति अस्मिन्लोके चरिष्यसि ज्योक् चिरकालं च सूर्यं पश्याति द्रक्ष्यसि च ॥

ad p. 9, l. 18. एकार्षेयाणामेका चूडा त्र्यार्षेयाणां तिस्रः इत्यादि गोत्रकल्पः । कुलकल्पस्तु पित्रादिभिराश्रितः प्रकारः । तथा नापितं बोधयेदिति शेषः ॥

ad p. 9, l. 19. पश्चाद्वपनस्नानानन्तरं प्रधानाहुतयः ॥

ad p. 10, l. 2—3. धान्यपल्वले धान्यक्षेत्रे । निखनेत् निगूहेत्कर्मकरः ॥

द्वादशः खण्डः ॥

ad p. 10, l. 5—6. अतिक्रान्तषोडशवयस्कं ब्राह्मणं नोपनयीत । अनियतेन्द्रियतया ह्येष शूद्रप्रायो भवतीति ॥

ad p. 10, l. 8—14. हे सोम ब्रह्मणा मन्त्रेण महे महते श्रोत्राय श्रोत्रियत्वाय परिदधामसि परिधानवस्त्रं करोमि । इमं यथा जरिमा जरा अशक्तिः न यात् न प्राप्नुयात् यथा च ज्योक् सदा श्रोत्रे श्रोत्रियत्वे अधिजागरादधिकं जागरूको भवेत् तथा त्वमनुगृह्णीष्वेति शेषः । ण यादिति सांहितं णत्वं । अथ कुमारं प्रति जीवाहीत्यादि व्याख्यातं । राष्ट्राय राज्यरक्षायै । हे पोषेति पोष्याधिष्ठात्रीं देवतां प्रति । पोषाय पुष्ट्यै समृद्ध्यै ॥

ad p. 10, l. 18. द्विषन्त (sic) इत्यकारान्तं प्रथमैकवचनं द्विषन्नित्यर्थः (!) ॥

ad p. 11, l. 1—4. वः तुभ्यं । अदृष्टाय बृहते परमात्मने नमः करोमीत्यन्वयः । लिङ्गात्कुमारेण वक्तव्यो मन्त्रः ॥

ad p. 11, l. 4. (अधिगन्तरधिगच्छ) अधिगन्तव्यमिति शेषः । एवमाचार्यः कुमारं ब्रूयात् ॥

ad p. 11, l. 4—5. इत्थमाचार्यं कुमारो ब्रूयात् । असावित्यत्राचार्यनाम संबुद्ध्या अमुष्मै इत्यत्रात्मानं चतुर्थ्या च निर्दिशेत् ॥

ad p. 11, l. 6—7. आचार्याञ्जलिगतानामपां नीचैःस्रावेण इतरस्य शिष्याञ्जलेः पूरणं स्यात् । इदमुदकप्रदानरूपेण गुरोर्वेदप्रदानप्रतिज्ञानम् ॥

ad p. 11, l. 7. एनमाचार्यं कुमारः संशास्ति प्रार्थयति ॥

ad p. 11, l. 9—10. सु मर्त्यं प्रयुयोतन प्रमिश्रय भगवन्वयं तु आगन्त्रा अस्मानागच्छता सह समगन्महि संगच्छेमहि ॥

ad p. 11, l. 12—14. स त्वं मा विस्रमः मा विश्लथितो भव । हे अमृत । रुलोपः सवर्णदीर्घश्च छान्दसः । मृत्योरन्तरं प्रवेशरन्ध्रं च मा कुरु॥

ad p. 11, l. 14—17. हृदयदेशमालभ्य जपति नाभेरविच्छेदेन दक्षिणमंसमन्ववमृश्य ततो हृदयदेशमालभ्य कुमारस्य इमं मन्त्रं जपति आचार्यत्वेन व्रते मयि मम वाचं वदमयीमेकव्रतः अचञ्चलब्रह्मचर्यं त्वां मयि नियुनक्तु नियोजयतु मद्वश्यं करोत्वित्यर्थः ॥

ad p. 12, l. 8—10. (ऋतस्य etc.) ऋतस्य आश्रमधर्मस्य गोप्त्री तपसश्च परस्पी पालयित्री अरातीश्च शत्रून्सहमाना प्रसह्य वर्तमाना मा रिषाम मा नश्येम भर्तारो धर्तारः । शिष्टं स्पष्टम् ॥

ad p. 12, l. 12. कौपीनं कटिवस्त्रं चान्तरं तत्क्षौमं वा शणसंबन्धि वास्यात्सर्वेषामित्यर्थः ॥

ad p. 12, l. 18. भिक्षावाक्ये क्षा इति च हि इति चाक्षरे न वर्धयेन्नोच्चैर्ब्रूयात् । नीचैस्तरामितरवर्णेभ्यो ब्रूयादित्यर्थः ॥

ad p. 13, l. 3—4. (अनूच्य etc.) एवमुक्तो वटुः सावित्रीमनूच्य वेदमादितः किंचिदेकसामावरमृक्पूर्वमाचार्यादधीत्य पठिष्यमाणैश्चतुर्भिर्मन्त्रैश्चतस्रो घृतेनाक्ताः समिधो ऽग्नावादध्यात् । उपनयनप्रभृत्यासमावर्तनपर्यन्तं यद्ब्रह्मचर्यं तद्व्रतमात्र एभिर्मन्त्रैरादिश्यते । तदिदं षोडशे गोदानकरणे विसृज्य पुनरपि तत्रापोद्धृत्य स्त्रजमादेशयेतेति विधास्यति (cf. p. 17, l. 1)। समावर्तने त्वस्यात्यन्तविसर्गः । इदं विसृज्यैव गौदानिकाद्यन्तरालव्रतादेशः॥

ad p. 13, l. 8. तदेतन्मन्त्रचतुष्टयेन समिदाधानं वस्त्रादेरप्युपलक्षणं सर्वत्र गौदानिकादिव्रतोपक्रमे ऽपि कर्तव्यम् ॥

ad p. 13, l. 9—10. व्रतसमाप्तावत्रादिष्टस्य महतो व्रतस्य समाप्त्यर्थे समावर्तनाङ्गदण्डसादनात्पूर्वकाले गौदानिकादिसमाप्तौ च एभिर्मन्त्रैः समिध आधेयाः तदानीं च मन्त्रानेवमूहेदित्यर्थः ॥

ad p. 13, l. 12. (त्रिरात्रम् etc.) अक्षारलवणं च भैक्षमाचार्यानुज्ञयाश्नीत ॥

ad p. 13, l. 13—14. अभ्यज्य आज्येनासिच्य । स्थालीपाकेन चरुणा व्याहृतिभिरिष्ट्वा तन्मूले हुत्वेत्यर्थः । यज्ञोपवीतं दण्डं च ब्रह्मचारिणस्तस्मिन्नेव पलाशे उन्निक्षिप्य प्रत्येयात् प्रत्यागच्छेत् । ततश्च यज्ञोपवीतं दण्डं चान्यदाददीत ॥

त्रयोदशः खण्डः ॥

ad p. 13, l. 15—16. मार्जयेत आत्मानं प्रोक्षयेत् । तन्मध्ये सूर्यश्चाग्निश्चेति सायंप्रातर्मन्त्राचमनं स्मृतिसिद्धम् ॥

ad p. 13, l. 16. (वामदेव्यमन्ते) अन्ते वामदेव्यं प्रोक्षणमन्त्रः स्यात् । अन्तग्रहणमिदमन्यैरपि स्मृत्यन्तरसिद्धैः प्रोक्षणं तरत्समन्दीयादूर्ध्वं ज्ञापयति ॥

ad p. 13, l. 16—18. नक्षत्रोदयोपलक्षितकालादधि सन्ध्यां परमात्मानमादित्यान्तर्वर्तिनं ध्यायेदित्यर्थः । स्मृतिसिद्धार्घ्यदानानन्तरकृत्यमेतत् । प्रातर्विशेषो वक्ष्यते (p. 13, l. 21) । सायमपेक्षो ऽयं विधिः ॥

ad p. 13, l. 18—19. प्राणायामप्रकारस्तु सव्याहृतिकमित्यादि मनूक्तः (cp. Mānavadharmaśāstra VI. 70; II. 78) । स्मृत्यन्तरसिद्धतर्पणानन्तरकृत्यमेतत् । आवर्तयेत् पठेत् ॥

ad p. 13, l. 19. (शतकृत्वो वा दशावरम्) दशावृतस्त्ववरं मतमित्यर्थ. (B: दशावृत्तयस्त्ववरम्मत°) ॥

ad p. 14, l. 1—2. यस्मिन्सुप्ते ऽनुत्थिते सूर्य उदेति स सूर्याभ्युदितः । यस्मिन्सुप्ते ऽनुत्थिते सूर्यो निम्रोचति अस्तमेति स सूर्याभिनिम्रुक्तः । तच्छेषं तस्मात्सुप्तिकालादहःशेषं रात्रिशेषं वा ॥

चतुर्दशः खण्डः ॥

ad p. 14, l. 4. श्रवणसमवस्थितचन्द्रयुक्तपौर्णमासी श्रावणी । तथा प्रौष्ठपदी । वर्षापौर्णमास्योरन्यतरः स्यादित्यर्थः ॥

ad p. 14, l. 4. (हस्तेन) तन्नक्षत्रयोगिपूर्णिमाभावे संनिधानाद्वार्षिकेण हस्तेन उपाकुर्यादित्यर्थः ॥

ad p. 14, l. 4—6. सर्वे आचार्यः शिष्याश्च । पुरस्ताज्जप इत्युक्त्वा भूम्यालम्भजपात्प्रागेव कार्यः । अध्येष्यमाणो वेदः नः सहास्तु सर्वे-

पामधीनो ऽस्तु । तथा भुनक्तु परिपालयतु । तथा शेषमपि ज्ञातव्यं । मा विद्विषामहै वयं परस्परम् ॥

ad p. 14, l. 8--9. छन्दांस्याग्नेयैन्द्रपवमानानि । आदितः ऋक्पूर्वं । अधीत्य अध्याप्य । यथार्थं यथाशक्ति एकर्चावरमित्यर्थः ॥

ad p. 14, l. 9--10. ऋषिभ्यः स्वाहेत्यादिप्रकारेण । ऋष्यादीन् षड्विष्ठा ऋचं सामेत्यादि ऋग्भिश्च तिसृभिस्तिस्र आहुतीर्जुहुयादित्यर्थः । ऋषय ऋक्सामद्रष्टारः । देवा ऋकसामवाच्याः । छन्दांसि ऋक्सामयोर्यानि गायत्र्यादीनि । यजूंषि यानि सूत्रब्राह्मणमन्त्राणि ॥

ad p. 14, l. 10. एताभिरेव धानाभिः पूर्वाभिः षड्भिः षडाहुतिमन्त्रैरित्यर्थः । तानेव ऋष्यादींस्तृप्तिभाजः कुर्यात् । तानावाहनादिभिः संपूज्य हुतशेषा धानास्तेभ्यो निवेद्याचार्य्यः शिष्याश्च तानद्भिस्तर्पयेयुः ॥

ad p. 14, l. 10—13. (आचार्यमाचार्यांश्च) आचार्यं जैमिनिमाचार्यांस्तलवकारादीनेतांस्त्रयोदश ऋष्यादीनिव तृप्तिभाजः कुर्यादित्यर्थः ॥

ad p. 14, l. 16. (सावित्रमहः काङ्क्षन्ते) सावित्रमहः हस्तनक्षत्रं । तदेव पर्वदक्षिणा कर्मणि च काङ्क्षन्ते केचिदाचार्याः ॥

ad p. 14, l. 16. ( उत्सर्गे च ) सावित्रमहः अन्यच्च कर्मजातमुपाकृतिवदेव स्यात् ॥

ad p. 14, l. 16—17. ( पक्षिणीं...अश्नीयात् ) पक्षिणीं पक्षतुल्यागामिवर्तमानाहर्युक्तां रात्रिमुत्सर्गे इति शेषः । आचार्यस्यैवैतानि वर्णानि ( sic ) स्युः ॥

पञ्चदशः खण्डः ॥

ad p. 15, l. 1--2. यथास्वं स्वस्थानेषु । छन्दांसि गायत्र्यादीनि । चतुरुत्तराणीत्युपलक्षणमन्येषामपि शिवेन सहेति शेषः । नो अस्मानिति । इत्थमर्थाभि (?) सन्धिपुरःसरमुक्त्वा उत्स्रष्टव्यमित्यर्थः । ततश्च स्विष्टकृदादि हविःशेषप्राशनान्तमुपाकर्मवत् ॥

ad p. 15, l. 2--3. ( उत्सृज्या°...अधीयीरन् ) अध्यायदिने ऽध्ययनमनध्यायदिने तदभावश्च । उभयोरनुपालनं । यथास्वं स्वायत्तं (B: स्वायुक्तं ) पठितमेव वेदावयवमित्यर्थः ॥

ad p. 15, l. 3. अनस्तैष्याः पूर्णिमाया ऊर्ध्वमभ्रेषु सत्सु मेघच्छन्ने ऽह्नीत्यर्थः । नाधीयते नाध्येतव्यम् ॥

षोडशः खण्डः ॥

ad p. 15, l. 4. गोदानसमाप्तिकं पवमानपर्यन्ताध्ययनमत्र गोदानशब्देनोच्यते । व्रतानीति आरण्यपर्वादौ । दशाध्यायी उपनिषदिति ।

तंवशाव्यव्याहृतिसामगायत्राणि यदुपनयनादि षद् द्वादश वा वर्षानं याघदध्ययनकालं वा ब्रह्मचर्यमिति वक्ष्यमाणकालमध्ये गोदानसमावृतसामोपनिषत् साम्नामध्ययनार्थास्त्रयः संवत्सरा भवन्ति । औपनिषदस्तु समानव्रतत्वादत्रोपात्तः वक्ष्यमाणादादित्यव्रातिकात् (p. 15, l. 6) परो विज्ञातव्यः । इदं च सूत्रं तत्तत्संवत्सरानुष्ठेयव्रतविधानार्थम् ॥

ad p. 15, l. 4—5. तेषु त्रिषु संवत्सरेषु उदकोपस्पर्शनं स्नानम् ॥

ad p. 15, l. 5. अनुपस्पृश्य अस्नात्वा प्रातर्भोजनं न कुर्यात् । भैक्षचरणादि त्वस्नातेनापि कार्यमिति भावः । दिनचतुर्भागे ऽत्र प्रातःशब्दः ॥

ad p. 15, l. 5. (साय᳚...आधानात्) न भुञ्ज्यादिति शेषः । भैक्षचरणं तु स्नानात्प्राक् समिदाधानादनन्तरमन्तरा वा स्नानसमिदाधानयोर्भवति । प्रदोषान्ते दिवसचतुर्भागे ऽत्र सायंशब्दः ॥

ad p. 15, l. 5—6. (अरण्यात्...'दध्यात्) सदा सायं समिदाधानमिति वक्ष्यमाणस्य (p. 16, l. 8) अयमेतद्व्रतविषयो गुणविधिः । इदं व्रतं गौदानिकनिमित्तत्वेन त्रित्वं गौदानिकं व्रातिकमौपनिषदमिति तत्तत्संज्ञां च लभते । तथा च संवत्सरत्रयस्यादौ त्रिरादेशनमन्ते त्रिः समाप्तिश्च तंदतद्व्रतादेशनं सर्वत्रेत्यादि विधिः । तत्र व्रतादावग्ने व्रतपत इत्यादिमन्त्रेषु गौदानिकं व्रतं चरिष्यामि अन्ते अचारिषमित्यादि तत्तन्नामनिर्देशः । उपनयनादिष्टं सामान्यव्रतं तु सर्वेष्वेष्वनुसरति । एवमुत्तरत्र ग्राह्यं । अत्र औपासनवत्पूर्वोत्तरमन्त्रमध्ये व्रतसमिदाधानं व्रतादौ तु पूर्वपरिषेकात्प्रागुपनयनवत् । यज्ञोपवीतमेखलाजिनदण्डधारणं च प्रायः कुर्वन्ति । उपाकृतेः प्रागेव गौदानिकादेशः ॥

ad p. 15, l. 6. (आदित्यव्रातिकः संवत्सरः) आदित्यव्रतानि शुक्रियसामानि । उक्तकालमध्ये तदध्ययनार्थः संवत्सरो भवति । इदं तद्व्रतविधानार्थम् ॥

ad p. 15, l. 6. (एकवासाः) एकसहायं वासो यावद्ध्वंसं वसीत ॥

ad p. 15, l. 6—7. (न युक्तमारोहेत्) युक्तमनोरथप्रभृति ॥

ad p. 15, l. 8. (नोर्ध्वं...प्रस्नायात्) अपः प्रस्नायात् प्रस्यन्दयेत् । अशुचित्वनिमित्तं तु स्नानं भवति ॥

ad p. 15, l. 8—9. तस्मिंस्तस्मिन्संवत्सरे व्रते समाप्ते सति श्रावयेदध्यापयेदित्यर्थः । इति गौदानिकादीनि चत्वारि समाप्तानि ॥

---

१ These difficult and doubtless corrupt words are handed down thus in M[2]: व्रशव्यव्याहृतिसामगायत्री...(lacuna)...दिपुयद्वा दश वर्षान्

सप्तदशः खण्डः ॥

ad p. 15, l. 10. महानाम्न्य इति विद्मा मघवन्निति शक्करीत्रयं ससाम (वसामि M) । तदध्ययनार्थाः द्वादश संवत्सराः नव षड्वा । त्रयो वा संवत्सरा इति विविधास्तत्र कल्पा भवन्ति ॥

ad p. 15, l. 11. श्रुता अध्यापिता भविष्यन्ति चेदित्यर्थः ॥

ad p. 15, l. 11—12. शुक्लत्वमत्र शुचित्वं । विहिते काले संवत्सरमात्रमेव चरेत् ॥

ad p. 15, l. 12. (व्रतं...दिवा) व्रतं समग्रं चरन्दिवा भूयः बहुशस्तिष्ठेत् ॥

ad p. 15, l. 12. (अथास्मीत नक्तं) भूय इति शेषः ॥

ad p. 15, l. 12—13. (तस्य...परिदध्यात्) अन्नं तु तदुक्तवद्भा भवत्विति भावः ॥

ad p. 15, l. 13. (रागदोषान्न कृष्णं) रागदोषाद्धेतोः कृष्णं न परिदध्यात् ॥

ad p. 15, l. 14. उपस्पृशेत् स्नायात् । प्रत्यहमनेन (प्रत्यग्गमनेन M) या स्नानयोग्या यवृच्छया (°पृच्छया M)[1] संगम्यन्त (संगम्यंत M) तासु सर्वास्वित्यर्थः । अप इत्युक्ता अवुक्ता (thus emended ; चयुक्ता B, अभुक्ता M) इति हेतोः । अस्ति हि श्रुतिः आपो वै शक्कर्य इति ॥

ad p. 15, l. 14. (नावा न प्रस्नायात्) नावा अपो न प्रविशेत् । अवतीर्यैव नद्यादिकं लङ्घयेदित्यर्थः ॥

ad p. 15, l. 14—15. (प्राण°...उभयतः) प्राणसंशये तु नावैव लङ्घयन्नुभयतस्तीरयोरुपस्पृशेत् स्नायात् ॥

ad p. 15, l. 15. उभयत इति शेषः । पशूक्ता इति । अस्ति हि श्रुतिः पशवो वै महानाम्न्य इति ॥

ad p. 15, l. 15—16. प्रतिवृष्टि गृहान्निर्गतः किंचित्क्लिन्नो गृहं प्रविशेदित्यर्थः ॥

ad p. 15, l. 16—17. (एवमस्य...उपोषितः) ब्रह्मचर्यान्ते महानाम्नीब्रह्मचर्यान्ते इत्यर्थः । एकरात्रं एकमहोरात्रमुपोषितः स्यादिति शेषः ॥

ad p. 15, l. 17—19. (अरण्यं...सपुरीषाः) तस्मिन्नुपोषणदिने । आचार्यकृत्यमेतत् । अपामद्भिरित्यर्थः । तं ब्रह्मचारिणमुपवसन्तं । समनुपरिगृह्यालिङ्ग्य । निमीलितं मीलिताक्षं कृत्वा । स्तोत्रियाः स्तोत्रियसामसहिता महानाम्नीः । उपगायेत् अध्यापयेत् । एवा ह्येवेत्यादि पञ्च पुरीषपदानि ॥

ad p. 15, l. 19—20. शिष्यो ग्रामं प्रत्येत्येति शेषः ॥

---

[1] Read: यदृच्छया ।

ad p. 15, l. 20—p. 16, l. 1. (रात्रिम°...वाग्यतः) उदपात्रं धारयन्निति शेषः ॥

ad p. 16, l. 1—2. (श्वो°...वेष्टयेत्) आचार्यकृत्यं । श्वो भूते प्रभाते । वासः मुखवेष्टनवस्त्रम् ॥

ad p. 16, l. 2. (उद्यम्य...वीक्षेत्) ता एवापः । ब्रह्मचारिकृत्यम् ॥

ad p. 16, l. 2—4. (स्वर°...°पहरेत्) अपः कांस्यगताः । प्रकृतमेव वासःप्रभृति । उपहरेत् दद्यादाचार्याय गृहं गताय ॥

ad p. 16, l. 4—5. स्थालीपाकात् हविषेत्यर्थः (sic) । पुरस्तन्त्रान्ते इदमिति व्रतसमाप्तिद्योतकः । तस्मादत्रैव व्रतान्तसमिध आधाय स्विष्टकृदाद्युत्तरतन्त्रम् ॥

ad p. 16, l. 6—7. (गौर्दक्षिणा) दत्तस्य वत्सस्य माता गौरेव दीयते । महानाम्नीकव्रतं समाप्तम् ॥

अष्टादशः खण्डः ॥

ad p. 16, l. 7. वेदार्थं ब्रह्मचर्यं यदुपनयन आदिष्टं तद्द्वादश वर्षाणि चरितव्यम् ॥

ad p. 16, l. 7. (जननात्...एके) तथा चोपनीय (तथा चोपरि M) षड्वर्षाणीत्यर्थः । सप्तमे ह्युपनीयते ॥

ad p. 16, l. 7—8. (यावदध्ययनं) ब्रह्मचर्यंचरणमिति शेषः ॥

ad p. 16, l. 8. (सदा...आधानं) औपासनवत्तन्त्रं । अग्नये समिधमित्याद्युपनयनवदाहुतिः ॥

ad p. 16, l. 8—9. द्वे त्रिवृती त्रिप्रकारे वस्तुनी केते इति चेत्त्रिवृतं मणिं त्रिगुणे उपानहौ च वर्जयेत् ॥

ad p. 16, l. 9. (षोडशे गोदानकरणं) गोदानमिति केशान्तकरणं तत्संस्कारः । तदस्मिन्पाकयज्ञे इति । तद्गोदानकरणमिदमपि वृणोति ॥

ad p. 16, l. 9—10. (तत्...आचक्षते) अत एवोपनयनाद्येतावत्कालं केशा धार्या इति ज्ञायते । ब्रह्मचर्यान्ते एतत्कर्म । पञ्चमे चोपनयने तदादि द्वादश वर्षाणि ब्रह्मचर्यं तन्मध्ये चानुकल्पाश्रयेण महानाम्न्यिमाप्तं मेधाविना च अध्येतव्यजातस्य सर्वस्याप्यध्ययने चार्थादिदं षोडशे भविष्यतीति मुख्याभिप्रायेणेदं (मुख्यान्तप्रा° M) षोडश इत्युक्तं पक्षान्तरेण तदाग्वापरं (sic B; तदन्याग्वापरं M) वा यथाकथंचित् ब्रह्मचर्यावसान एवेदं कुर्यात् ॥

ad p. 16, l. 11. अविकृतं विरूपाक्षहोमान्तं कर्तव्यं । आनीयाद्भि(भि)श्च प्रोक्ष्य इति विशेषः ॥

ad p. 16, l. 10—11. (उपनयनेन व्रतादेशनं) वक्ष्यमाणमपोद्धृत्य स्रजमादेशयेतेति (p. 17, l. 1) आदेशनमुपनयनेन व्याख्यातमिति शेषः। तदेतद्व्रतादेशनं सर्वत्रेति सिद्धे इदमुपनयनादिष्टस्य महतो व्रतस्येह निवृत्तिं ज्ञापयति। अतो विरूपाक्षाद्युत्यनन्तरं व्रतान्तसमिध आधेयाः। पुनरादेशकालं तु वक्ष्यत्यपोद्धृत्य स्रजमादेशयेतेति ॥

ad p. 16, l. 11. (न त्विह...वासः) इह व्रतादेशे ऽहतं वासः न नियुक्तं न नियतं। अस्तु वा मा वेत्यर्थः। अत एव सर्वत्र व्रतादेशेषूपनयनवन्नूतनवस्त्राद्यस्तीति ज्ञायते ॥

ad p. 16, l. 11—12. (सर्वाणि...औद्गाहमनिः) समिदाधानादनन्तरमुदकदानाद्या (sic M; °मुदगादानाद्याः B) वपने त्वयं विशेषः। औद्गाहमनिराचार्यः। आचार्यग्रहणं पूजार्थम् ॥

ad p. 16, l. 12. (उप्तकेशः स्नायात्) उप्तकेशः धान्यपल्वले गोष्ठे वा निखातकेशः ॥

ad p. 16, l. 12—14. वनस्पतीनां चर्मणा संपिष्टेन स्नानीयेन। वनस्पतेस्त्वगसि त्वं हे शोधनि मा शोधय। तां त्वाभिहरे धारयामि ॥

ad p. 16, l. 15. (स्नात्वा°...कुरुते)कुरुते आत्मानमलंकुरुते। देवेषु मनुष्येषु च मध्ये मे पुण्यं गन्धं कुरु। शिष्टं स्पष्टम् ॥

ad p. 16, l. 19—p. 17, l. 1. आदर्शो ऽसि त्वं देवमनुष्या उभये मामादृश्यासस्त्वादरेण दृश्यासुः। शोभो ऽसि शोभयितासि त्वं देवेषु मनुष्येषु च मध्ये अहं शोभासं शोभिषीय। रोचो ऽसि रोचयितासि त्वं देवमनुष्येषु अहं रोचासं रोचिषीय ॥

ad p. 17, l. 1. (अपोद्धृत्य...°देशयेत) अपोद्धृत्य अपनीय स्रजमस्याचार्य आदेशयेत व्रतसमिध आधापयेत्। एतत्कर्मादौ निवर्तितस्य व्रतस्य पुनराधानं। कुतः ॥

ad p. 17, l. 1—2. (उक्ता...संवत्सरेषु) प्राक्संवत्सरेषूक्ता एवाापि नियमा न नूतनमिति भावः। तत उत्तरतन्त्रं प्रायश्चित्तान्तं कृत्वा मूर्धारम्भजपः ॥

## एकोनविंशः खण्डः ॥

ad p. 17, l. 3—5. स्नास्यन्यथाशक्ति दक्षिणां दत्त्वा गुरुणानुमतः समावर्तनं करिष्यमाण इत्यर्थः। स्नानं स्नानीयं। शुक्ले अनुपभुक्ते उपानहौ ॥

ad p. 17, l. 5. उपक्लृप्तः संनद्धः ॥

ad p. 17, l. 6—7. पूर्वतन्त्रान्ते व्रतान्तसमिध आधायानन्तरकृत्यमेतत्। आस्तीर्य पश्चादग्नेरिति शेषः। अप्सु तत्रैव पात्रावस्थितास्वप्सु ॥

ad p. 18, l. 18. (तयो°...भवतः) दधि च मधु च तयोर्विष्टरयोर्मध्ये यथा भवेतां तथा तौ विष्टरौ कृत्वा संनिहिते अन्तश्चमसासिक्ते भवतः। इदमितरयोर्मधुपर्कयोरुपलक्षणम् ॥

ad p. 18, l. 18—19. (दध्ना...°मन्थः) दध्ना चेन्मधुसंनिहितं स दधिमन्थनामा मधुपर्कः ॥

ad p. 19, l. 3. (परः...गौरिति) परः अन्यः। स्वाधितिपाणिः खड्गपाणिर्भूत्वा। गां तस्मै स्नातकाय दृष्ट्वा दर्शयित्वाह ॥

ad p. 19, l. 3—4. (ताम°...धेनुरिति) गौर्धेनुरित्यादिमन्त्रेण तामभिमन्त्र्य ॥

ad p. 19, l. 4. (कर्तव्या...ब्रूयात्) कर्तव्या भोजनार्थं संस्कर्तव्या चेत्। कुरुतेति संस्कुरुतेति ब्रूयात्। न त्वभिमन्त्रयेत ॥

ad p. 19, l. 4—8. इति मन्त्रः। गौः धेनुः पातव्याक्षीरा। हव्या हविर्योग्या ॥

ad p. 19, l. 7—8. विष्टरादिगवान्तमिहार्घ्यशब्देनोच्यते ॥

ad p. 19, l. 8. (तेभ्य...कुर्यात्) आतिथ्यमतिथिभोजनभूतां गामर्घ्यादेरप्युपलक्षणं कुर्यात् संस्कुर्यात् अनुत्सर्गे सति ॥

ad p. 19, l. 8—9. तां संस्करिष्यमाणां गामतिथये त्वा जुष्टं प्रोक्षामीत्यन्तेन सावित्रेण प्रोक्षेत् ॥ इति समावर्तनम् ॥

विंशः खण्डः ॥

ad p. 19, l. 10—11. अनग्निकां यस्मिन्वयसि स्वयमेव लज्जया वासः परिदधाति तद्वयस्कां। समानजातीयामसवर्णां मातुरसपिण्डां मातुर्धशरीरत्वात्पितुरप्युपलक्षणं। संगतः पिण्डे शरीरो यस्याः सा सपिण्डा। वरस्य मात्रा पित्रा च रक्तधातुसंबन्धरहितामित्यर्थः। तच्च सापिण्ड्यं सप्तपुरुषमितिवत् सप्तमे शरीरे निवर्तते। तथा च मातुलदुहितुर्दुहिता पितृष्वसृदुहितुर्दुहिता इत्येवमादयः अपरिग्राह्याः मातुः स्वपित्रा तस्य स्वपुत्रेण तस्य स्वदुहित्रा तस्याश्च स्वदुहित्रा धातुसंबन्धो ऽस्तीति मातुलदुहितृदुहिता मातुः पञ्चमीति त्याज्या। एवमन्यत्राप्यूह्यम् ॥

ad p. 19, l. 11—12. (ज्यायसः कनीयसीं) ज्यायसः वयसा ज्येष्ठतमस्य वरस्य। कनीयसीं वयसा यवीयसीं जायां कुर्यात् ॥

ad p. 19, l. 12—14. दूतं दुहितृमतिप्रदाननिर्णयाय प्रस्थास्यमानं गणपतिसंकल्पस्य सत्यं कुरु। नान्दीप्रतिसरानन्तरकृत्यमेतत् ॥ अनृक्षराः अशर्कराः। ऋजवः पन्थाः पन्थानः सन्तु। एभिः पथिभिः नः सखायः

वरेयं कन्यागृहं यन्ति प्राप्नुवन्ति । अर्यमा च नः समनुनीयात् भगश्च नः समनुनीयात् । हे देवाः जास्पत्यं जायापत्यं सं सम्यक् सुयममस्तु सुकरमस्तु ॥

ad p. 19, l. 14—16. दूत्यकृत्यानुष्ठानस्वस्तिवाचनकन्यावेश्मगमनमधुपर्कग्रहणसंभारकल्पनानन्तरकृत्यमेतदनुमन्त्रणम् ॥

ad p. 19, l. 19. पूर्णपात्रनिधानानन्तरकृत्यमेतत् प्रोक्षणाद्या कर्म समाप्तेः ॥

ad p. 19, l. 20. [मातु॰...मात्री] मातुरभावे अशक्तौ तन्मात्री तत्सदृशा धारयेत् । मातुः स्वसा मातामही वा ॥

ad p. 19, l. 21—p. 20, l. 1. एवंजातीयं एवंप्रकारमन्यद्वा आस्तरणं कशिपु कम्बलादि । यथा संवेशनकाले प्रसार्यमाणं परिस्तरणबर्हिषः पश्चार्धे प्राप्नोति स्पृशति ॥

ad p. 20, l. 1—3. अथ समुपनिहितं देवस्य त्वेति प्रोक्ष्यानन्तरमेवास्यै वासस्मै ददाति । प्रतिवासो मन्त्रावृत्तिः । या देवीः देव्यः इदं वास अवयन तन्तुसंतानं कृतवत्यः । या अतन्वत विस्तारितवत्यः । या अकृन्तन् खण्डितवत्यः । या अभितः अन्तान् (thus also the text is to be emended) दशाः अददन्त कृतवत्यः । तास्त्वा देवीर्देव्यः जरसा सह संव्ययन्तु संयोजयन्तु । आयुष्मतीत्यादि स्पष्टम् ॥

ad p. 20, l. 3—4. परिहितोपसंवीतवस्त्रद्वयां आचान्तोपस्पृष्टां वधूमग्न्यात्मनोर्मध्येन नीत्वा उपवेश्य श्रीसूक्तेन मङ्गल्यसूत्रं बद्ध्वा भूषणान्यलंकृत्य प्रत्यङ्मुखः श्वशुरेण संकल्प्य यथाशक्ति दत्त्वा गोत्रनामपुरःसरं दत्तामनामुपवेश्य । भूम्यालम्भादिपुरस्तन्त्रः आज्यानन्तरं लाजानां वा इत्युत्पवनं । तन्त्रान्ते एरकां प्रसार्यानन्तरमिदं । अभिजहि आरोहेत्यर्थः ॥

ad p. 20, l. 4—5. ( प्र मे...कल्पतामिति ) वधूरेरकां प्राङ्मुखी आरोहति ॥

ad p. 20, l. 5. (अजपत्यां...प्रास्या इति) प्र मे इत्यादि तस्यामजपत्यां वरः स्वयं प्रास्याः पतियानः पन्थाः कल्पतामिति जपेत् ॥

ad p. 20, l. 5—6. (दक्षिणतः...पतिः) उपविशेदित्यर्थः ॥

ad p. 20, l. 6. (उभावन्वारभेयातां) उभौ दम्पती तामेरकामन्वारभेयातां सहैवारोहेताम् ॥

ad p. 20, l. 8—19. संराधा नाम देवता सा च पृथिव्यात्मका सात्रेज्यते । संराधा हे संराधे । या त्वमहं विधरणी इति सर्वस्य प्रपञ्चस्य धारयित्री इति संकल्प्य तिरश्ची निपद्यसे तिर्यक् भूता शेषे पृथिवीरूपेण त्वा त्वां घृतस्य धारया राधयामसि तर्पयामः । अत्र ऋगर्थे न सिद्धे ऋचः परं चतुर्थ्यन्त आदरात् ॥

एकविंशः खण्डः ॥

ad p. 20, l. 20. संपातसेकानन्तरमिदम् ॥

ad p. 20, l. 20. ( प्रहस्तं पुंसः ) पुंसः प्रजाः कामयमानः प्रहस्तं मणिबन्धनप्रदेशं गृह्णाति ॥

ad p. 21, l. 15--17. हे जानकि त्वं ईरसि ईर्नाम ( इद नाम B ) देवता श्रियो अधिष्ठात्री इषे त्वेत्यादि प्रसिद्धा सासि । दीर्घरेफौ (°रभौ MSS) प्रमादपठितावार्षौ वा । ते माता ऊर्क् ऊर्क् नाम देवता प्रजानामन्नानां चाधिष्ठात्री । सा ते माता । यस्मात्त्वमूर्जः पुत्री ईर् (इद B) चेति नाम सिद्धं तस्मात्सा तादृशी त्वं प्रजया सह रायस्पोषेण सह मामेहि प्राप्नुहि ॥

ad p. 21, l. 17—18. तस्यां प्रत्यागतायां भ्राता वा अस्या अन्यो वा बन्धुः लाजानभिघारितान् कृत्वा कारयित्वा वा शूर्पादञ्जलिनोपहत्योपहत्यास्या अञ्जलौ द्विर्द्विरावपेत् ॥

ad p. 21, l. 18--19. तान् लाजान् । इतरा पत्नी । कृत्वा भर्त्रा कारयित्वेत्यर्थः । प्रत्याहुति अग्निं परिक्रम्यपरिक्रम्य तिष्ठन्ती जुहुयात् । कन्यलेत्यादिमन्त्रांस्तु लिङ्गात्पतिरेव वदेत् ॥

ad p. 21, l. 19--p. 22, l. 3. इयं कन्यला कन्या पितृभ्यः पतिलोकं यती पितृगृहात्पतिगृहं प्राप्नुवती दीक्षां सहधर्मचारिणीनियममवयक्षत अवाप्नोति स्मेत्यर्थः । इयं नारी मम भार्या उपब्रूते मन्मुखेन ब्रूते । कथमिति चेत् । दीर्घायुरित्यादि । इयं कन्या मम भार्या अर्यमणं नु देवमिममग्निं भावयित्वा अयक्षत अयजत । स देवो अर्यमा इमां मां च इतः प्रदेशात् प्रमुञ्चतु मद्गृहं प्राप्तुमनुजानातु ॥

ad p. 22, l. 3—4. होमत्रयस्यास्य वक्ष्यमाणधारिकावपनस्य चान्ते चतुःकृत्व इमं मन्त्रं जपेत् ।

ad p. 22, l. 4—5. (तूष्णीं...चतुर्थं) चतुर्थमग्नावावपेत् लाजधारिका कामाय बध्वा इष्टप्राप्त्यर्थम् ॥

ad p. 22, l. 5. (दक्षिणं...°चक्षते) अतस्तेनावपेदिति भावः । कामसाधनत्वात्तस्मिन् कामशब्दः ॥

ad p. 22, l. 9—10. सप्तमे पदे पत्नीं निवर्त्य प्राङ्मुखीमवस्थाप्य उदकुम्भगताद्भिरुदकुम्भधरो लाजवापः पतिश्च तां प्रोक्षयेयुः ॥

ad p. 22, l. 10—11. विवाहोत्सवे प्रेक्षकाः ॥

ad p. 22, l. 12—15. प्रागेव तथा प्रतिज्ञाप्य तथा प्रतिज्ञां कुर्वतीं तां ध्रुवादीन्यदा प्रथममेते दृश्यन्ते तदा प्रेक्षयेत् । तान्दर्शयित्वा पश्येति प्रेरयेत् । सापि ध्रुवं दृष्ट्वा ॥

द्वाविंशः खण्डः ॥

ad p. 22, l. 18—21. स्वं कुलं भर्तृगृहं प्राप्तां तां वधूं सुशीलाः सुप्रजाः समवजीर्णाः जीवत्पतयो जरत्यः प्रत्यवरोपयन्ति शिबिकादिभ्यः स्वाङ्के अनेन मन्त्रेणावरोपयन्ति । एना एनेन । अजीर्वा अजीर्णा सती । शिष्टं स्पष्टम् ॥

ad p. 22, l. 21—p. 23, l. 1. अथ तां पतिर्जरतीनामङ्कात्प्रत्यवरोप्य वृषभस्य चर्मण्यास्तीर्णे अनया ऋचा उपवेशयेत् । पुरस्तन्त्रान्तकृत्यमेतत् ॥

ad p. 23, l. 1. तस्या अङ्के कुमारं निवेश्य तस्य हस्ते मोदकान् फलानि वा दद्यात् ॥

ad p. 23, l. 4. (...रमस्वेति) ततश्चोत्तरतन्त्रम् ॥

ad p. 23, l. 4—5. अधःसंवेशिनौ अखट्वाशायिनौ । असंवर्तमानौ अपरिष्वजन्तौ ॥

ad p. 23, l. 5—6. (ऊर्ध्वं...संभवः) त्रिरात्रादूर्ध्वं संनिहिते पुण्यदिने संभवः संयोगः स्यात् । चतुर्थस्याह्न अपुण्यत्वे यावत्पुण्यदिनं अपरिष्वजन्तौ सह शयातामेव ॥

ad p. 23, l. 6. (निशायां...°कर्मण्यं) ऊर्ध्वं त्रिरात्रान्निशायां चतुर्थ्यां रात्राविंत्यर्थः । जाया च पतिश्च जायापतिकर्मण्यं गृहस्थकर्माहं सायंप्रातर्होमादि तदाप्रभृति कार्यमित्यर्थः ॥

ad p. 23, l. 6—16. औपासनाग्नौ पुरस्तन्त्रान्तकृत्यमेतत् । संवेशनाङ्गो ऽयं होमः प्रत्याहुति संपातं च सिञ्चेत् ॥

ad p. 23, l. 16—17. प्रायश्चित्ताहुत्यनन्तरं चरोरवदायाग्नये स्वाहा प्रजापतये स्वाहेति ससंपातं हुत्वा । एतासां सप्ताहुतीनां संपातान्पात्रे समानीय भार्याहस्ते दत्त्वा सनाभिनवरन्ध्राणि समालिम्पेति तां ब्रूयात् ॥

ad p. 23, l. 17. (नाभिं प्रथमं) प्रेषिता सा मिश्रितैः संपातैर्नाभिं प्रथममञ्जीत ॥

ad p. 23, l. 17—18. (ततो यान्यूर्ध्वं) तत ऊर्ध्वं यानि चक्षुर्घ्राणकर्णास्यानि तान्यञ्जीत ॥

ad p. 23, l. 18. (ततो यान्यर्वाञ्चि) ततो यान्यर्वाञ्चि नाभेर्योनिपायवस्तान्यञ्जीत । ततः स्विष्टकृदाद्युत्तरतन्त्रं । आज्ये चरौ च क्रमात् प्रस्तरमूलाञ्जनं भवति ॥

ad p. 23, l. 18—19. (ऊर्ध्वमर्ध°...तृप्येत) संवेशनं मैथुनं । तृप्यस्यान्ते संयोगः ॥

ad p. 23, l. 19—p. 24, l. 1. भार्यां प्रत्यभिमन्त्रणं ।...इयं स्त्री हिरण्मयी अरणी पुत्रारणी एनामश्विनौ देवौ निर्मन्थतां निर्मथितां सूतवै प्रसवाय । शिष्टं स्पष्टम् ॥

ad p. 24, l. 1. [ऋतावृतावेवमेव] एवमेवार्धरात्रादूर्ध्वमेतेन तृचेन कुर्यादित्यर्थः ॥

ad p. 24, l. 1—2. [संवेशने...दद्यात्] अग्ने प्रायश्चित्तेत्यादि संवेशनहोमानन्तरमाचार्याय विवाहहोमप्रवेशहोमसंवेशनहोमानामङ्गभूतां दक्षिणां गां दद्यात् ॥

ad p. 24, l. 2. आचार्यस्यादर्शने उपद्रष्टृभ्यो ब्राह्मणेभ्यो दक्षिणां गां दद्यात् । विवाहः समाप्तः ॥

त्रयोविंशः खण्डः ॥

ad p. 24, l. 3. [सायंप्रातर्होमे] विधिं वक्ष्याम इति शेषः ॥

ad p. 24, l. 3—4. [अग्नय...उत्तरां] सायमिति शेषः । आज्यं पयो व्रीहिर्वा होमद्रव्यम् ॥

ad p. 24, l. 4. [एवं...सूर्यः] अयं विशेष इत्यर्थः । अस्य चौपासनस्य विच्छेदे ऽपि सायमुपक्रम एवायं भवति ॥

ad p. 24, l. 4—7. सायं प्रातश्च सिद्धस्यान्नस्य बलौ द्वौ उद्भागौ वर्धयित्वाखण्ड्य गृहीत्वा तयोः पूर्वस्मात्खण्डादन्नावेताः समाहुतीर्जुहोति औपासनाग्नौ तदभावे पचनाग्नौ ॥

ad p. 24, l. 7. [मनसोत्तरां] उत्तरां प्रजापतय इत्येतां मनसा जुहोति ॥

ad p. 24, l. 7—9 ततो होमार्थमुद्धृतादेवेत्यर्थः । सिद्धमाचारात् गन्धपुष्पमुभयतश्चोदकं बलिहरणेषु । ये देवा हर्षणाः हर्षकराः । वेपनाः भीतिकराः । स्फातिमाहराः भुक्तिमिच्छन्तः । वातस्य भ्राजमन्तरिक्षमनुसंचरन्ति । तेभ्य इत्यादि स्पष्टम् ॥

ad p. 24, l. 9—10. [एवमशनायति] अशनायति अन्नकामे सति पुरुषे एवमेव पूर्ववदेव बलिं भूयो हरेदित्यर्थः ॥

ad p. 24, l. 10. ( आयस्थाने...स्वाहेति ) तत्रावशिष्टं सर्वं आयस्थाने लभस्थाने संवत्सराहाराय ( ᵒसराभागाय B ) लभ्यमानस्य व्रीह्यादेः संग्रहस्थाने मृत्योरधिष्ठानाय स्वाहा इति मन्त्रेण बलिं हरेत् ॥

ad p. 24, l. 10—14. शेषस्य द्वितीयस्य उद्धृतान्नस्य बलिहरणमेतेषु सप्तसु आयतनेषु । ततः प्रदक्षिणमावृतं कुर्यात् । उद्धाने इत्यादीनामुदपात्रसमीपे । गृहमध्ये नवसु वास्तुभागेषु उत्तरपूर्वस्मिन्भागे खट्वा-

दे: स्थाने द्वारबाह्यशिलायां द्वारपिधानफलकायां वास्तुमध्ये इति क्रमादर्थः गृह्याभ्य इत्यादि स्पष्टम् ॥

ad p. 24, l. 14. (शेषं...निनयेत्) शेषं सर्वं ब्रह्मायतने एव धन्वन्तर्ये हरेत् ॥

ad p. 24, l. 14. [सदा... वाचनं] यथा प्रसन्ना ब्राह्मणाः स्वस्त्यस्त्विति वदन्ति तथा तेषां प्रेरणं स्वस्तिवाचनं । ब्राह्मणान्भोजनादिभिः सत्कुर्यादित्यर्थः । सो ऽयं मनुष्ययज्ञः ॥

ad p. 24 l. 14—15. यद्ब्राह्मणैः सत्कृतैः स्वस्तिवाचनं सा महती सर्वाग्निग्रानां शान्तिरित्याचक्षते वदन्त्याचार्याः । वैश्वदेवं समाप्तम ॥

चतुर्विंशः खण्डः ॥

ad p. 24, l. 16. नवविकारेण चरुणा यक्ष्यमाणस्तञ्जातीयेनैव पुराणविकारेण चरुणाग्न्यग्निधन्वन्तरी प्रजापतिमिन्द्रं च यजेत ॥

ad p. 24, l. 17. [तिस्रश्च नवाहुतीः] तदनन्तरं तिस्रो नवाहुतीर्वक्ष्यमाणा जुहुयात् । एकेनैव तन्त्रेणेति भावः ॥

ad p. 24, l. 17. (नवेन यजेत) वक्ष्यमाणविधिरेव सिद्धावयं विधिर्नियमार्थः । नवेन द्रव्येण यजेतैव नान्यत्र पूर्वं तद्विनियोग इति शरदि संबध्यते ॥

ad p. 24, l. 17. (शरदि व्रीहीणां) ऐन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्चरव इति प्रतिवाक्यं संबध्यते शरदि व्रीहीणां विकारेण ऐन्द्राग्नश्च वैश्वदेवश्च द्यावापृथिव्यश्च त्रयश्चरवः पृथक् पात्रपकाः स्युः ॥

ad p. 24, l. 18—19. (एकचरुर्वा) एकपात्रपक्वचरुर्वा ऐन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्च स्यात् । तदेवं पुरस्तन्त्रान्ते पुराणेनैकेनैव चरुणाग्निधन्वन्तरिभ्यां स्वाहा प्रजापतये स्वाहा इन्द्राय स्वाहा इति तिस्रो हुत्वानन्तरं त्रिभिर्वा चरुभिरेकचरुणा वा इन्द्राग्निभ्यां स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्यां स्वाहा इति तिस्र आहुतीर्जुहुयात । अथ स्विष्टकृत् । तत्र प्रतिहविः सकृदवदानं पञ्चावत्तिनः द्विर्द्विरेकैकस्मात् । ऋतुभेदेन तु द्रव्यभेदः ॥

ad p. 24, l. 19. (उक्ते...°घारणे) प्राशनाय होम इव उपस्तरणाभिघारणे कुर्यात् ॥

ad p. 24, l. 19. ( द्विर्हविषोऽवद्यति ) प्राशनाय नवात् हविषः द्विरवद्यति ॥

ad p. 25, l. 3—5. प्राश्याचम्य परतन्त्रं समापयेत् । विश्वचर्षणीः सर्वप्रजास्वरूपिणी (sic) । वाक्यावृत्तिः सम्यग्विज्ञापनार्था ॥

श्रीनिवासाध्वरिकृता टीकेयमतिलघ्व्यपि[1] ।
सुमतीनां भवेन्नित्यं संतोषाय सुबोधिनी ॥
इति जैमिनिसूत्रं पूर्वम् ॥
जैमिनिसूत्रमुत्तरम्[2] ।
प्रथमः खण्डः ॥

ad p. 25, l. 6—8. शुचिवाससः शुक्लवाससः । वास्तु गृहं । सव्यमाचरन्तः अप्रादक्षिण्येन क्रियाः कुर्वन्तः । हविष्यैस्तिलैरुपसिच्य संसृज्य अन्नमुपसाधयेरन् पचेरन् ॥

ad p. 25, l. 9—11. (पाद्यमानीय etc.) सर्वस्मात् (सवस्मात् B, व्यध्वस्मात् M) तदहरुच्चारात्प्रागुद्धृतं पाद्यं स्नातवद्भ्यस्तेभ्यः समानीय दत्त्वा तान्ब्राह्मणांस्त्र्यवदातान् त्रिभिर्विद्याजन्मवृत्तैरवदातान् शुद्धान् आ मे गच्छन्त्वित्यादिना उपवेशयेत् ॥

ad p. 25, l. 11—13. मूलसमीपे छित्त्वा समाहृतान्दर्भान्प्रसव्यान् अप्रदक्षिणं बद्धान्विष्टरान् कृत्वा मन्त्रैर्ब्राह्मणेभ्यः प्रदद्यात् ॥

ad p. 25, l. 13—14. (हविष्यो°...दद्यात्) हविष्यैस्तिलैः सहितमुदकं तिर्यङ् न्यस्तपवित्रं गन्धान्सुमनसश्च तूष्णीं दद्यात् ॥

ad p. 25, l. 14—17. अवत्त्वा अवदाय । परिस्तरणीयानीति (sic B en M) इतिशब्दः प्रभृतिपर्यायः इध्मपरिधिमेक्षणानां ग्रहणार्थः । तत्सर्वमादायाग्नौ करिष्यामीत्युक्ते कुर्विति तैरनुज्ञातः । प्राग्दक्षिणामुखः आग्नेयाभिमुखः । त्रिर्धून्वन् हस्वतृणानि ॥

ad p. 26, l. 5—6. क्षीरं घृतं वासिञ्चति । वर्धयित्वा प्रभूतं परिवेष्य (परिवेष्ट्य the MSS.) । मया प्रत्तं दत्तं हविः । आमासु पक्वमाममपि अपक्वमपि असुपक्वमपि दुस्वादुपक्वमपि तस्मिन्निदमन्न्यममृतं निविष्टं तस्य त्वं हे पितरः यूयं स्वधया मदध्वमित्यर्थः ॥

ad p. 26, l. 6—17. वर्धितानि एतद्व इत्यादिभिरादिशति संकल्पयन्ति । ... (ad अमृता etc. l. 8): हे अग्ने त्वं एकधामापि अद्वितीयस्वरूपो ऽपि त्रिवृता त्रिविधयावृत्त्या पश्यन्ती मध्यमा वैखर्यात्मना वर्तमानो ऽसि । तस्माद् द्वे वाचो ऽमृतवाचः सरस्वत्याः अमृतपरमार्थस्वरूप तेजोमयी वागिति हि श्रूयते । त्वदनुग्रहेण वाक् ऋङ्मयी अत्र या प्रयुज्य-

---

१ °लघ्वपि B, M.

२ This indication not in the MSS.

माना साप्यमृता भवतु । पितॄणां श्रवणीया भवतु । वाचः वाक्यमन्यश्च अमृता भवन्तु । एभिरित्यादि स्पष्टं । हे देवा इहलोके अस्मभ्यं वसीयः सुखमस्तु । (ad l. 10 sq.): अयं यज्ञ इत्यादिपूर्वार्धं स्पष्टं । पितृदैवत्यं पात्रदेयमिदं हविरपि परमं भवत्वित्यर्थः । नो अस्माकं वाक्च मनश्च पितर इति प्रतिजानीम पितृस्वरूपमित्येव संकल्पयामः । तस्मात्तदुभयं शुद्धं । अश्विभ्यां प्रत्तं अश्विनोर्बाहुभ्यां दत्तं तस्माद्धविरपि शुद्धमिति भावः । (ad l. 12 sq.): य इह पितर इत्यादि स्पष्टं । ये पितरः वाचं वाचः श्रुत्या रहस्यं वस्त्वाप्त्वा ब्रह्म विदित्वेत्यर्थः (ब्रह्मविदित्यत्यर्थः B) अमृता बभूवुः । शिष्टं स्पष्टं ॥

ad p. 26, l. 18. अनुदिशति निर्दिशति ॥

ad p. 26, l. 19—p. 27, l. 2. मे मया संपादिता भोज्यादयः । यद्यदि । अप्रकामा अरमणीयाः । प्रकामा रमणीया वा । ब्राह्मणे भोक्तरि । समृद्धे श्रोत्रिये । यद्यपि सति । अब्राह्मणे वा अश्रोत्रिये । यद्यपि वा सति । यो वात उग्रां निर्ऋतिं श्राद्धघ्नं रक्षो यथा स्कन्दति निगृह्णाति । नः पितरः येन प्रकारेण प्रीयन्ते तथा तत्सर्वं स वायुः शुन्धतु शुद्धं करोतु । तेनेत्यादि स्पष्टम् ॥

ad p. 27, l. 4—6. यन्मे मया दत्तं मन्त्रकृतं हविः रामा शकुनिः श्वापद इति तिर्यग्योनयः एवमादिरशुचिर्जन्तुः । प्राशत् प्राश्नाति स । वैश्वानर इत्यादि स्पष्टम् ॥

## द्वितीयः खण्डः ॥

ad p. 27, l. 7—11. शेषमनुज्ञाप्य अन्नशेषैः किं क्रियतामिति प्रश्नेन इष्टैः सह भुज्यतामिति प्रत्यनुज्ञां लब्ध्वा । उल्मुकं संनिहितादेव पितृकार्याग्नेः कंचिदुल्मुकमाकर्मसमाप्ति अनिर्वाप्यदग्निकं (sic) निदध्यात् ॥

ad p. 27, l. 13. अपहस्तेन पितृतीर्थेन ॥

ad p. 27, l. 15—17. मात्रादीनामविचारेण (°नां विचारेण B) पित्रादीनविवेचयतः इदं पितृभ्य इत्यादयो मन्त्राः ॥

ad p. 27, l. 19 sq. पित्रे नमः पितामहाय नमः प्रपितामहाय नम इति नमस्कृत्य । एतद्व इत्यादिना क्षौमपुच्छं वा वस्त्रपुच्छं वाच्छिद्य वस्त्राण्यभिसृजन्ति ॥

## तृतीयः खण्डः ॥

ad p. 28, l. 15—16. मार्गशीर्षमासे या पौर्णमासी सा आग्रहायणी । ततः परं ये त्रयो ऽपरपक्षास्तेषामपरपक्षाणां मध्ये एकैकस्मिन्नपरपक्षे एकैकाष्टका कर्तव्या भवति । अष्टम्यां कर्तव्या श्राद्धक्रिया अष्टकेत्युच्यते ।

ताश्च तिस्रो ऽष्टकाः क्रमात् शाकाष्टका मांसाष्टका अपूपाष्टकेति च अभिधीयन्ते ॥

ad p. 28, l. 16—p. 29, l. 2. तेषां हविषां तैर्हविर्भिः ओदनेन च पृथक्पृथक्पठितैश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीः स्थालीपाकावृता रेखनादिपूर्णपात्रदक्षिणान्तक्रमेण जुहुयात् । अष्टकादयस्तिस्रो देवताः संवत्सरादि पञ्च प्रकाराभिन्नः ( °न्नं B )कालात्मा भगवान् चतुर्थी देवता । तस्मै भगवते नमोभिर्हविर्भिः कृणुता तृप्तिं कुरुत हे सखायः।कृणुता इति सांहितो दीर्घः। तेषां संवत्सरादीनां पञ्चानां यज्ञियानां यजनीयानां सुमतौ सुमत्या अनुग्रहेण वयं सकुटुम्बाः ज्योक् चिरमजीता अजीर्णाः अहताः अविच्छिन्नायुषश्च स्याम भवेम ॥

ad p. 29, l. 2—3. अग्रभ्य आहुतिभ्यः परमेहि भगेति त्रिरुक्त्वा अग्निमुपस्थाय स्विष्टकृतं हुत्वा प्रस्तरादानाद्युत्तरतन्त्रं समापयेत् । स्विष्टकृदवदानं तु हविर्द्वयात्पृथक्पृथक्सकृत्सकृद्भवति ॥

ad p. 29, l. 4. [तस्या°...श्रोणीमिति] तस्या गोः सव्यं पार्श्वं सव्यं जघनं सव्यमुरु [ l. °मूरुं ] च हविरर्थमुद्धरति ॥

ad p. 29, l. 4—5. यस्मिन्दिने अयं होमः ततः परस्मिन्दिवसे अन्वष्टक्यं नाम श्राद्धं कर्तव्यं होमदिवसे वा ॥

ad p. 29, l. 5—7. ब्राह्मणान्हविरर्हान् दत्तदन्तधावनस्नानीयादिकान् स्नातांश्च दत्तपाद्यान् आ मे गच्छन्त्वित्यादिनोपवेश्य तांस्तर्पयित्वा आसनादिशेषानुज्ञापनपर्यन्तं यथाविधि कृत्वा प्रत्येत्य यावत्पिण्डनिधानकर्म । प्राग्दक्षिणायतं चतुरश्रं गोमयेनोपलिप्य तस्मात्पितृहोमाग्नेर्दक्षिणतः षडग्नीनित्युपलक्षणं यावत्पिण्डसंख्यानग्नीनित्यर्थः प्रणीय ये रूपाणीत्यादिना प्रागुक्तेन प्रतिष्ठाप्य ये समाना इति प्रदक्षिणपर्यन्तं यथा न नश्येत्तथा कृत्वा तेषामग्नीनामेकैकस्मिन्नग्नावेकैकस्याग्नेरुत्तरपश्चादेकैकां कर्षूमवटमायामेन प्राग्दक्षिणेन प्रादेशमात्रीं पार्थिवेन पृथुत्वेन विस्तरेण त्र्यङ्गुलामवाग्वा । वाशब्दश्चार्थः । अधस्ताच्च निम्नतयेत्यर्थः । एकाङ्गुलां खानयेत्खिनेत् ॥

ad p. 29, l. 8. ( तासु...°हस्तेन ) तासु कर्षूषु अपहता इति पृथक् रेखा लिखित्वा अनुलेखं दर्भानास्तीर्याचमनादि क्रमेण यथाविधि षट् पिण्डान्मिलितेन हविर्द्वयेन निदध्यात् । पिण्डभाजस्त्वत्र मन्त्राः पितृभ्यः पार्श्वानि श्रोणामिति वचनात्पितृमातृपितामहपितामहीप्रपितामहप्रपितामह्य इति गम्यन्ते । जीवतो विना मृतानामेव पिण्डदानमिति ग्राह्यं । अनुनामापहस्तेनेति वध्वंशकथनस्योपलक्षणत्वात् ( वध्वांश° M, विध्यंश° B) पूर्वखण्डोक्तः सर्वो ऽपि विधिरत्र प्राप्नोति ॥

ad p. 29, l. 8—9. मांसाष्टकायामुद्धृतस्य सव्याङ्गत्रयस्य अन्तरं सारभूतं मज्जांशं पितृभ्यः पितृपितामहप्रपितामहेभ्य उपकर्षति पार्श्वानि बाह्यांशानि स्त्रीभ्यः मातृपितामहीप्रपितामहीभ्यः प्रददातीत्यर्थः ॥

ad p. 29, l. 9—11. तत्रामयावी पिण्डान्प्राश्नीयादित्याद्युक्तपिण्डविनियोगे केचिदध्वर्यवः कर्मतन्त्रकर्तारः पूर्वाचार्याः प्रजाकामस्य पत्नी मध्यमं पिण्डं प्राश्नीयात् । श्राद्धस्य सर्वस्यापि स्थालीपाकं हुतशेषमन्नं वा पत्नी प्राश्नीयादिति ब्राह्मणेष्वधीयते ॥

चतुर्थः खण्डः ।

ad p. 29, l. 12—13. अथ दहनादिसंस्कारपटलमुपक्रमिष्यमाण आहिताग्निसंस्कारस्य प्रधानत्वात्तमेव प्रथमं विधित्सुः सतिशरीर (sic, cp. p. 29, l. 17) इत्यादिना अनष्टशरीरस्य विशेषं विधास्यन्नष्टशरीरस्याहिताग्नेः कर्तव्यं विदधाति । आहिताग्नेः शरीरनाशे पलाशत्सरूणां पलाशपत्रनालानां त्रीणि षष्टिशतानि षष्ट्युत्तरशतत्रयमाहृत्य तैरस्थां प्रतिनिधिभूतैः कृष्णाजिने त्वक्स्थानापन्ने कृष्णाजिने नाडिस्थानापन्नैः कुशैर्बन्धनसाधनस्तानितान्यङ्गानि बद्ध्वा प्रतिकृतिं कुर्यात् । तत्र प्रत्यङ्गमियत्तापरिच्छेदे (sic) ब्राह्मणमेवोदाहरति अशीत्यर्धमित्यादि विज्ञायत इत्यन्तेन ॥

ad p. 29, l. 13—17...इत्येवंप्रकारेण एतावन्ति एतावत्संख्यानि इहलोके पुरुषस्य मध्ये शरीरं शरीरमध्ये शरीराणि शरीराङ्गभूतान्यस्थीनि भवन्तीति विज्ञायते श्रुतौ दृश्यत इत्यर्थः । अथ आहिताग्नेः क्रमसंस्कार उच्यते. Now follows immediately the text (with commentary) of Jaim. brāhm. (cp. Journ. of the American Oriental Society, XIX, p. 103 sqq.) I. 46; I. 47; I. 48. After the comm. on Jaim. br. I. 48. 5 the text continues: इत ऊर्ध्वं संस्तरणीं नाम गां हत्वा तस्यास्तत्तदङ्गानि परेतस्य तत्तदङ्गेषु विन्यसनादिविधिः कलावनुपयुक्तत्वान्न व्याख्यातः; then follows the sūtra (cp. Jaim. gṛhs. p. 30, l. 3): आस्ये हिरण्यशकलमादाय (sic) उपरि काष्ठानि संस्तीर्य यथास्थितमग्नीन्प्रोह्य उपदीपयन्ति (cp. Jaim. br. I. 49. 5); then follows Jaim. br. I. 49. 6, first sentence (unto देवलोकः प्रत्यागच्छति) and then Jaim. gṛhs. p. 30, l. 4 (अथ सामभिरुपतिष्ठते) unto l. 6 (...इति ब्राह्मणं). Colophon of this part: इत्याहिताग्निदहनपटलः ॥

ad p. 29, l. 17—18. वक्ष्यति (viz. p. 30, l. 7) आहिताग्नेश्चेत्पूर्वं जाया म्रियेत तां निर्मन्थ्येन दहेदित्यादि तस्यायं पुरस्तादपवादः निरग्निकरणनिष्पुरीषकरणाहुतीनां निवृत्त्यर्थश्च । अन्यत्सर्वमाहिताग्निवदेव ।

सतीशरीरं पतिव्रताशरीरमित्यर्थः । उपरिष्टाद्वक्ष्यमाणनिर्मन्थ्येन दहनं तु अपतिव्रताया इति गम्यते ॥

ad p. 29, l. 18—p. 30. l. 2. (अत्र पात्राणि...इत्येतेनानुवाकेन) अत्र सतीशरीरदहने तस्यामित्याद्यनुवाकविहितं यज्ञपात्रनिधानमपि आहिताग्निवदेव कुर्यादित्यर्थः । वचनेनापि सिद्धे सत्यारम्भो ऽयं नियमार्थः । अत्रैव पात्राण्यपचिनोति (sic) नान्यत्रेति । तस्मान्निर्मन्थ्येन दहने पात्राणामग्नीनां च उत्सर्ग एव न तु चितासंयोगः उभयत्रापि भार्याभावात् आहिताग्नेः श्रौतकर्मलोपस्तुल्यः ॥

ad p. 30 l. 2. (य एवंवित्...पूर्वमेव) स यदोपतापी स्यादित्यादिना पूर्वोक्तः । जीवत एव श्मशानप्रवेशविधिः पूर्वमेव कृतादियुगेष्वेव नाधुना प्राकृतैस्तथा कर्तुं शक्यमित्यर्थः ॥

ad p. 30, l. 3. (चतुर्गृ°...°संभवं) अन्यमाहिताग्नीतरमौपासनाग्निमन्तं समिदाधानाग्निमन्तं वा । आहिताग्निसंस्कारोक्तप्रकारेषु यथा यावता प्रकारेण संभाव्यते तथा संस्कुर्यात् । चतुर्गृहीतं गृहीत्वा । होमस्तु सर्वेषामग्निमतां कार्य इत्यर्थः ॥

ad p. 30, l. 4—6. (सामभिरुप° etc.) सामभिरेतैर्वक्ष्यमाणैरग्निमुपतिष्ठते । नाके सुपर्णमिति ऋचो (ऋच M) ग्राम्ये गेयमरण्ये गेयमिति च द्वे सामनी । तत्र ग्राम्यं सामात्र गेयं भवति । चिताग्निसंयोगेन धूम उदिते सति त्वेषस्ते धूम ऋण्वतीति साम गेयं । अग्नौ समारूढे परेतं स्पृष्टवति अग्ने मृड महं असीति अस्यामृचि द्वे सामनी । तयोरन्यतरेणोपतिष्ठते । असौ लोकः परागवै भवति असंनिहितो वै भवति । तस्मात्पराग्भिरेतैः सामभिरुपतिष्ठेत अनावृत्तैरित्यर्थः । इति हि ब्राह्मणं इति प्रशंसनार्थः ॥

पञ्चमः खण्डः ।

ad p. 30, l. 6—7. निर्मन्थ्येनापूर्वारणिमन्थनजनितेन । सांतपनेन श्रौताग्निसंतप्तकपालोद्भूतेनाग्निना वा तां दहेत् । अत्र वक्तव्यसतीशरीरमित्यादि सूत्रव्याख्यानावसर एव उक्तम् ॥

ad p. 30, l. 7—9. श्मशानकृतं श्मशानार्थस्थलं । अनिरिणं ऊषरवर्जितं । अपसलवक्रोदकं अपसव्यावृत्तोदकं च । स्वकृतं स्वत एव तथाविधं । तदलाभे यत्नतस्तथा कृत्वा वा यत्र वा ओषधयो जायन्ते तस्मिन्स्थले वा शरीरं निःशेषं दग्ध्वा दग्धमनवेक्षमाणा उदककरणाय यान्ति ॥

ad p. 30, l. 9—10. (न वाहिनीषु कुर्वन्ति) वाहिनीषु नदीषु प्रवाहजलेष्वित्यर्थः उदकदानं न कुर्यात् किंतु स्थावरजलेषु वाप्यादिष्वेव कुर्यादित्यर्थः ॥

ad p. 30, l. 10. (तेषां योयः...ऽग्रं) तेषामुदकदायिनां मध्ये योयः पश्चाज्जातः वयसन्यूनः स्यात्सो ऽग्रमुदकदानमाचरेत् । तदनन्तरं वयोज्येष्ठ इत्यर्थः ॥

ad p. 30, l. 10—11. (कुर्यादुपकूलं) जलमध्ये उदकदानं न कुर्यात् किंतु उपकूलं कूलसमीपे कुर्यात् । यथा कूले क्षिप्यमाणं जलं पुनर्वाप्यादौ संनिपतेत् तथा कुर्यादिति गम्यते ॥

ad p. 30, l. 11. [अकूले...खात्वा] वाप्यादिजलस्य कूलादतिविप्रकृष्टत्वादिनिमित्तेन जलाशयकूले उदकदानं कर्तुं अलाभे सति कचित्कूपं खात्वा घटाद्याहृतजलेन तस्मिन्कूपे कुर्यात् ॥

ad p. 30, l. 11—12. एतच्च उदकं गोविन्दशर्मन्नित्येवमादिप्रकारेणेत्यर्थः ॥

ad p. 30, l. 12. (वाहिनीषु...केशान्) स्थावरजलालाभेन प्रवाहजलेष्वेवोदकदाने केशानुच्चैर्बद्ध्वा उदकं दद्यादित्यर्थः । अन्यत्र मुक्तकेशैनैव उदकदानमिति गम्यते ॥

ad p. 30, l. 12—14. (निमज्ज्य etc.) उक्तप्रकारेण निमज्ज्य एकाञ्जलिं दत्त्वा लम्बमानान् केशान् करनिष्पीडितजलानुपनिबध्य जलाशयतीरं (रा MS.) नीतस्य दीप्ताङ्गारकरस्य उल्मुकस्याग्निमनेन मन्त्रेण स्पृशेत् । शुकाहिर्नाम कश्चिदग्निः । अपहतेति व्यत्ययात् बहुवचनं अपजहीत्यर्थः ॥

ad p. 30, l. 16—17. कल्याणीभिर्दीर्घायुषो भवन्त इत्यादिभिः शोकापनोदिनीभिर्वाग्भिरित्यर्थः ॥

ad p. 30, l. 17. माषो नाम प्रमाणविशेषः । माषप्रमाणपरिमितस्वर्णे विक्रीतद्रव्येण सर्वे क्षुद्यावृत्तिं कुर्वन्ति । अल्पमश्नन्तीत्यर्थः ॥

ad p. 30, l. 18. (शान्त्या वा) किंचिदप्यभक्षित्वा वेत्यर्थः । इत्युदकदानविधिः । अथ संचयनविधिः ॥

ad p. 30, l. 18—19. क्षीरोदके समे संसृज्य शरीरागतस्थीनि मृण्मयेन कोशेन औचित्यात् गोशृङ्गाकारनिर्मितेनेत्यर्थः ॥

ad p. 30, l. 20. (असंह्लादयन्) असंह्लादयन् कटकटाशब्दमकारयन् ॥

ad p. 31, l. 1. तदाहृत्य गच्छन् कंचन चतुष्पथं महावृक्षं नदीं वा अतीत्य गत्वा तीर्थेषु पुण्येषु निखनेत् ॥

ad p. 31, l. 2. प्रेतस्य तृतीये ऽहनि संचयनानन्तरं संस्कर्तारं श्रोत्रिया अपामार्गपिष्टेन मृदा गोमयेन च स्वकरदत्तेन स्नापयन्ति ॥

ad p. 31, l. 2—3. (वासांसि ...आसते) सर्वेऽप्यग्निन इति शेषः॥

ad p. 31, l. 3. [चतुर्थ्यां...°वर्तयेरन्] चतुर्थदिवसमारभ्य अग्निनः सर्वे भिक्षाशनेन जीवेयुः तस्यां भिक्षायां श्रोत्रियगृहे नीतायां वैश्वदेवादेः सिद्धत्वाद्यज्ञशेषाशितया पूता ह्यग्निनो भवन्तीति भावः ॥

ad p. 31, l. 4. (कालं च...संतरेयुः) यावत्कालं च ये (वयं MS) अग्नौकरणादिकारिणो भवेयुस्तावत्कालं भिक्षाशिनश्च स्युरित्यर्थः ॥

ad p. 31, l. 4—5. (ऊर्ध्वं etc.) एकोद्दिष्टश्राद्धप्रदानपर्यन्तं दशाहमध्ये विहितादन्यत् न किंचित्कस्मैचिद्दद्युः ॥

ad p. 31, l. 5. (नक्षत्रेषु नियमः) एकोद्दिष्टश्राद्धस्य नक्षत्रनियम उच्यते ॥

ad p. 31, l. 5—6. (मघासु...°समयेषु) एकतारेषु आर्द्राचित्रास्वातीषु पूर्वसमयेषु पूर्वफल्गुनीपूर्वाषाढापूर्वप्रोष्ठपदासु ॥

ad p. 31, l. 6. (न रोहिण्यामुत्तरेषु ध्रुवेषु) उत्तरेषु उत्तरफल्गुणीउत्तराषाढोत्तरप्रोष्ठपदासु एतान्येव प्रतिषिद्धानि नक्षत्राणि ध्रुवाणीत्यभिधीयन्ते । विहिताभे [sic] प्रतिषिद्धेतरेषु नक्षत्रेष्वपि कुर्यादिति भावः ॥

ad p. 31, l. 6—9. सामान्यश्राद्धापेक्षया एकोद्दिष्टश्राद्धे विशेषविधिरुच्यते । एकवत् यथाश्राद्धं पिण्डप्रदानं च क्रियमाणं मृतमेकं प्राप्नोति । तथा मन्त्रवाक्येषु पितामहादिनिर्देशवर्जं पदविन्यासः कर्तव्यः । ये च त्वात्रान्वित्यादि च न ब्रूयात् । मृतस्य एकस्यैवार्थे त्र्यवरा ब्राह्मणा भोजनीयाः । ते च वस्त्रादि (1. वस्त्रादिभिः) सर्वकामैश्च तर्पणीयाः । पिण्डदानानन्तरं च गच्छता ऽनुमन्त्रणं शेषस्याप्राशनं (sic) स्वस्तिवाचनानन्तरं भोजनं चेति ॥

षष्ठः खण्डः ॥

ad p. 31, l. 10—11. गृहकर्माणः गृहस्थाश्रमधर्मस्य सिद्ध्यर्थं गृहवृद्धिं गृहस्य धनधान्यैर्द्विपद्भिश्चतुष्पद्भिश्च समृद्धिमिच्छन्नुक्तकाले गृहशान्त्याख्यं कर्म आरभेत ॥

ad p. 31, l. 11—15. अपामार्गादयो ऽष्टौ । सदाभद्रा शिशुपूला । अमृताः पूर्वा [l. दूर्वाः] । तृणं कुशाः । परिसमूह्य संमृष्टधूल्यादिकं कचित्समूहीकृत्य । सिद्धार्थकान् सर्षपान् । वास्तुबलिं कृत्वा गृहमध्ये प्रदेशमीश्व-[व]ल्लिगन्धपुष्पादिभिरलंकृत्येत्यर्थः । अलंकृतवास्तुस्थले पुरस्तन्त्रान्ते वास्तोष्पतये स्वाहेत्याज्येन हुत्वा सावित्र्या सहस्रं चाज्येन जुहुयात् ॥

ad p. 31, l. 15—16. उक्तप्रकारेण चतसृषु विदिक्षु होतव्यं वास्तुमध्ये मात्रं वेत्यर्थः ॥

ad p. 31, l. 16. [गौर्वा°...दक्षिणा] त्रयमिदं समुदितं दक्षिणात्वेन देयं न तु विकल्पः ॥

ad p. 31, l. 16—17. परिविष्य तर्पयित्वा । पुण्याहं भवन्तो ब्रुवन्त्वित्यादि तैः पुण्याहं वाचयित्वा समापयेत् ॥

ad p. 32, l. 1—3. अश्वादिकं वा उपतप्येत सर्वेषां द्विपदां चतुष्पदामन्यतरद्वा उपतप्येत तदाप्येवं जुहुयादित्यर्थः ॥

अष्टमः खण्डः ॥ १

ad p. 32, l. 12. अथातः अनश्नत्संहिता प्रयोक्तव्या संहिता अनश्नत्संहिता तत्प्रयोगं तत्प्रयोगविधिं व्याख्यास्याम इत्यर्थः ॥

ad p. 32, l. 12—13. अनश्नत्संहितायाः प्रयोक्ता शुक्लवासाश्चीरवासा वा स्यात् ॥

ad p. 32, l. 13—14. ब्राह्मण एव अनश्नत्संहितां प्रयुञ्ज्यान्न तु क्षत्रियवैश्यौ ॥

ad p. 32, l. 21—p. 33, l. 1. सामसावित्रीं तत्सवितुर्वरेण्यमिति साम । सोमं राजानमिति साम । ब्रह्म जज्ञानमित्यृचि सामद्वयं च मनसाधीत्य वेदादिमारभेत ॥

ad p. 33, l. 1. [संतत°...मौनी] संततमविच्छिन्नधारं यथा भवति तथा मौनी व्यवहारान्तररहितः ॥

ad p. 33, l. 1. [न चान्तरा विरमेत्] संहितासमाप्तिपर्यन्तं मध्ये विरतो न भवेत् ॥

